- Ending- इतिश्री कालिदासविरचितं मेघदूताख्यं खाण्डकाव्यं समाप्तम्। श्रीलडुकेशशरणम्। "परिवेति परिवेत्ता च या च परिविद्यते। ते सर्वे (xx)कं यान्ति वा (xx)चलपञ्चमः।।"

2. Manuscript no. L/671

- Title of the ms- *MDṭīkā*
- Name of the commentary- *Vyākhyā*
- Name of the commentator- Raṅgadāsa
- Finding place-It is purchased from Sakuntala Satapathy, Kāduasāhi of Khaṇḍaparāgarh.
- Language- Sanskrit
- Script- Odia
- Size- 32.5 in Length and 3 c. m. by Breadth.
- Status- Incomplete
- Condition- Neither very bad nor so good but readable.
- Folia- 33
- Lines per folio- 4-5
- Letters per line- 80+
- Style of the letters- bold, uniform and legible
- Beginning- श्रीवक्रतुण्डाय नमः।

  "प्रणम्य पुण्डरीकाक्षं जगद्धेतुमहेतुकम्। व्याख्या श्रीरङ्गदाशेन मेघदूतस्य लिख्यते।।"

3. Paleographical study of Manuscript 'A'

A study of the paleographical features of ms 'A' reveals the presence of two scribes. The first scribe writes the whole text at a stretch. Then only he writes the commentary up to 93 verses. (Of course some of the verses are found to be not commented upon.) The second scribe filled the gap up to verse no. 109 and leaves rest of the verses un-attempted. It is quite curious to mark that the second scribe seems to have adopted Mallinatha's commentary doggedly. As a result of which some of the words of the text does not tally with the commentary. It's plagiarism is caught thereof. Some of the examples could be highlighted thus.

Verse no.	Text	Commentary
96	नवजलमयम्	जललवमयम्
98	मीनक्षोभाच्चलकुवलय	मीनक्षोभाकुलकुवलय
99	सरसकदलीस्तम्भगौरः	कनककदलीस्तम्भगौरः
100	सहस्व	सहेथाः
101	विद्युद्गर्भः	विद्युत्कम्प
102	तत्संदेशैहृदयनिहितैरागतम्	तत्संदेशैर्मनसि निहितादागतम्
103	परमविहिता	परमवहिता
105	प्रतनु	सुतनु
107	वक्त्रच्छायाम्	गण्डच्छायम्

It might so happened that the second scribe, unknowingly (or knowingly?) helped his father/preceptor/family member/relative etc. in a way to complete the text. But on contrary, he fell into the trap of confusion and false authority.

4. Paleographical study of Manuscript 'B'

No texts of *MD* are found to be written in ms 'B'. Only commentaries upto 69 verses are written in full and the commentary of 70th verse is incomplete. Surprisingly, this ms

is not written with a single handwriting. Two handwritings are used here. The second scribe writes thrice in this ms. The situations are as under:

- Folio no. B24b, vs no. 26, text from युक्तम्। पानयोग्यम् to ह्रेषितम्।। एवम्
- Folio no. B23b, vs. no. 47-48, text from रम् आप्यायये: to व्यालम्बेथा:। अत्र
- Folio no. B32b, vs. no. 69-70, text from शन्तीति वहन्ति till the end of this ms.

5. Methods adopted in this Study

In this Research work, the two codices are identified as 'A' and 'B'. There are two sides of a folio. The front side of a folio is called as Recto or symbolized as 'R' / 'a'. And the other side of a folio is known as Verso or marked as 'V' / 'b'. Here, the two sides of a folio are identified as 'a' and 'b'. Each folio is numerated as 1, 2, 3 etc. So, the sigla are given in this work as follows: A1b, A2a, A2b and B1a, B1b, B2a etc.

'A1b' means : A- ms. L/371
1- folio no. 1
b- back side of the folio

'B1a' means : B- ms. L/671
2- folio no. 2
a- front side of the folio

Similarly, the numbers of each and every folio are given in the text.

Different types of brackets are used for different kinds of emendations. They are as follows:

( ) letters replaced for worm-eaten.

{ } Suggested letter or word for erroneous letter or word.

[ ] Reference of sources of quotations by the editor.

(?) Doubtful emendation.


(xxx) Missing letters which could not be emended.

The references of verses and verse numbers of *MD,* are given only in chapter 1, according to the book entitled as *"Meghadūtam: in the eyes of commentators"* of Prafulla Kumar Mishra (et all). And the rest chapters are according to the *Meghadūtavyākhyā* of Raṅgadāsa.


6. Photocopies of some Manuscripts

Some photocopies of ms A and ms B are given below as sample.


A1b




A2a




A2b




A3a




B1a




B1b



B2a



B2b



THE TEXT

ॐ

१. **कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः**
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।१।।

A1b, *B1a* श्रीवक्रतुण्डाय नमः।

प्रणम्य पुण्डरीकाक्षं जगद्धेतुमहेतुकम्। व्याख्या श्रीरङ्गदासेन मेघदूतस्य लिख्यते।।

कश्चिदित्यादि। कश्चिदनिर्दिष्टनामधेयो यक्षः। रामगिर्याश्रमेषु रामोपलक्षितगिरेराश्रमेषु वसतिं वासं चक्रे। कृतवान्। किंभूतेषु। जनकतनयास्नानपुण्योदकेषु। जनकतनयायाः सीतायाः स्नानेन स्नानीयद्रव्येण पुण्यानि पा(व)नानि उदकानि जलानि येषु। पुनः किंभूतेषु। स्निग्धछायातरुषु छायाप्रधानास्तरवः। छायातरवः स्निग्धछाय इत्यर्थः। शाकपार्थिवादिदर्शनात् मध्यपदलोपी समासः। स्निग्धाश्चिक्कणाः। सदा पुष्पादिसमवेतत्वात् रागवृद्धिकराः छायातरवो येषु तथा च। "छायातुः *A2a* स्थिरछाया" इति त्रिकाण्डशेषः। "छायातरुर्नमेरुः स्यादि"त्यपि मतभेदोऽस्ति [बलः]। "छायातरुः सदा पूर्णः पुष्पैः किशलयैः फलै"रिति विश्वः। असौ किंभूतः। स्वाधिकारप्रमत्तः। स्वस्य(ा)धिकारात्कश्चित्व्यापारात्प्रमत्तः। प्रमाणमगृहीतः। अनवहित इति भावः। जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादाने पञ्चमी समासः। पुनः किंभूतः। शापेनास्तङ्गमितमहिमा। शा*B1b*पेन विग्रहविधिना अस्तङ्गमितो विनाशं प्रापिता महिमा आधिपत्यं दिव्यक्रमेण शक्तिर्यस्य स तथोक्तः। कस्य शापेन। भर्त्तुः स्वामिनः कुवेरस्य शापेन। किंभूतेन। वर्षभोग्येण संपूर्णसंवत्सरभोग्येण। वर्षनिरन्तरतया भोग्यो वर्षभोग्यः। ते(न) वर्षमिति (कालाध्व)नोरत्यन्तसंयोगे द्विती(या)[1] [अष्टाध्यायी

---

1. **A, B** (कालाध्व)नोरत्यन्तसंयोग इति द्विती(या)
2. **A** द्वितीया (श्रि)तातीतगता इत्यत्र।
   B omits this line

२.३.५]। द्वितीया (श्रि)तातीत{पतित}गता{त्यस्तप्राप्तापन्नै}रित्यत्र[२] [अष्टाध्यायी २.१.२४] । द्वितीया इति योगविभागात् समासः। समासान्तसमीपयोर्वेति णत्वम्। पुनः किंभूतेन। कान्ताविरहगुरुणा। कान्तायाः कमनीययोषितो विरहेण विच्छेदेन भिन्नदेशाव(स्था)नलक्षणेन गु(रु)णा दुः(स)ह(त्वा)न्महता। कान्तियोगात्कान्तास्पर्शादित्वात्तत्। कान्तिर्यथा। अथवा अकारप्रश्लेषो द्रष्टव्यः। तेनायमर्थो भवति। ननु स्वामिना। किमर्थं शापो दत्तः। इत्यादि। स्वव्यापारं विहाय कान्तायाः यो विरहस्तेन गु(रु)णा शापेन। तथा हि। अत्रैवं किल मुखबन्धे कथा श्रुयते। परमेश्वरेण कुवेरेण कश्चिद्यक्षः शिवार्चनार्थं कारितायाः कमलवनिकायाः पर्यायरक्षणे आज्ञया नियोजितः। तत्रासौ दुःसहविरहवेदनाकुलितमतिः। स्वामिनोऽप्याज्ञां विलङ्घ्य स्वकान्ता*B2a* न्तिकमगछत्। एतस्मिन् अन्तरे वनगजेन तत्सरः कमलमेवाकुलिकृतम्। एतादृशं वृत्तान्तमुपश्रूयते। तस्य निजयुवतीलालसो यक्षः शप्तः। यस्यामासक्तस्त्वं कमलवनं न रक्षितवान्। तया कान्तया विरहितो वर्षमेकं भवेदिति। अतः कश्चिदित्युक्ते(न अ)सौ यक्ष इत्याकांक्षादोषेण (अ)वघोषणीयः। (स्वा)मिवचनं (वि)लंघकस्य {पापस्य}[१] ग्रन्थादौ नाम संकीर्त्तनस्यायुक्तत्वात्। कल्पितकथायां नामसंकीर्त्तने प्रयोजनमपि नास्ति। यदुक्तम् - "कथाबीजं व्यवस्थाप्य कश्चिदित्यादिभिः पदैरिति।" "अस्ति कश्चिद्वाग्विशेषः"। इति प्रतिज्ञां निर्वहतीति कालिदासः।।१।।

२. **तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।।२।।

A2b तस्मिन्नित्यादि। तस्मिन् विरहकारिणि। अद्रौ रामगिरौ कतिचिन्मासान् नीत्वा प्रेर्यकामा। कामातिशययुक्तः स यक्षः। मेघं ददर्श दृष्टवानित्यर्थः। कामातिशये हेतुमाह। किंभूतः। अबलाविप्रयुक्तः। अबलया प्रियया विप्रयुक्तो विरहितः। कान्ताविरहगुरुणा वियुक्तेऽपि। पुनरवलाविप्रयुक्त इत्युक्तम्। अन्याभिरपि कान्ताभिः सह त्वया क्रीडितव्यमिति भर्त्तुः शापम्। एवंविध इति सूचनार्थम्। यद्वा। *B2b* यत एव कान्ताविरहगुरुः। अत एवाबलाविप्रयुक्तः। (उ)क्तिपोषो नामालंकारः। "उक्तिपोषः क्वचिद्धेतोः फलभावेन योजनम्। क्वचिदाक्षेपलभ्यस्य साक्षाच्छब्देन कीर्त्तनम्।।" इति।।

अत एव कामुकत्वे सति अबलाविप्रयुक्तत्वेन असौ दौर्बल्याात्कनकवलय-

1. **A, B** पाप यस्य

भ्रंशरिक्तप्र(को)ष्ठः। कनकं सुवर्णं तस्य वलयः। कङ्कणं तस्य भ्रंशेन अधः पतनेन रिक्तः शून्यः प्रकोष्ठः। कूर्पराधभागो यस्य भुजदण्डो यस्य स तथोक्तः। तथा च। प्रकोष्ठोऽविस्तृतकरो हस्तो मुष्टि तु विद्धियात्। भूयः कक्षान्तरेऽपि चलति। कूर्परादधरेऽपि प्रतिष्ठा स्थानमात्रके। किंभूतं मेघम्। आश्लिष्टसानुम्। आलिङ्गितपर्वतैकदेशम्। पुनः किंभूतम्। वप्रक्रीडापरिणतगजप्रेक्षणीयम्। वप्र उन्नतभूभागे क्रीडया लीलया परिणतोऽवनतो यो गजः। तमिव प्रेक्षणीयम्। दर्शनीयम्। लीलापिण्डेति केचित्। वप्रक्रीडायां परिणतश्चासौ गजश्चेति। कस्मिन्नहनि मासे वा ददर्श इत्याह। आषाढस्य प्रथमदिवसे शुक्लप्रतिपदि। (अत एव) *B3a* क्रमेण कृष्णप्रतिपद्यपि गृहीते तदपि प्रत्यासन्ने नभसि न घटते। तर्हि कथं शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ। मासान् एतान् गमय चतुरो लोचने मीलयित्वेति वक्षति।[१] सायंकालस्याल्पसूचनाद्वाराप्रियां प्रोच्छाहयति[२]। कथम्। अन्यथा। निर्वेक्ष्यावः। परिणतशरच्चन्द्रिकास्विति घटताम्। उन्म(त्तो) वा हेतुः। कथमन्यथा मेघदूतं करिष्यति। अथवा प्रथमदिवस इति। "प्रथं ख्यातमदिवसे विष्णुदिवसे एकादश्यामि"ति यावत्। तथा च विश्वः। अस्यार्थो भावे स्वल्पार्थे विष्णो(र्दिवस)त्वेन (त्व)यमिति। एतदेव युक्तमुत्पश्यामः। अयमभिप्रायः। एतस्मिन् कालेऽखिलाम्बुवाहस्य गर्जितत्वेन असौ संजातोत्कण्ठतया सदाकांक्षतीत्यभिसम्बन्धात् विना कालनिर्णयः कृतः। प्रशमदिवस इति पा{ठा}न्तरम्[३]। तदपि युक्तम्। यतोऽनन्तरमेव प्रत्यासन्ने नभसि श्रावणे मासि इति वक्ष्माणत्वात्।।२।।

३. **तस्य स्थित्वा कथमपि पुरः केतकाधानहे-**
तोरन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालाके भवति सुखिनोऽप्यन्यथावृत्तिचेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।३।।

तस्येति। तस्य मेघस्य पुरोऽग्रतः। अत एव कथमपि प्रियावियोगवैकल्यात् कृच्छ्रेण स्थित्वा राजराजस्य कुवेरस्य अनुचरो भृत्यो यक्षश्चिरं बहुकालं दध्यौ चिन्तितवान्। ध्यानतत्परो बभूवेति यावत्। किंभूतस्य। केतकाधानहेतोः। केतकीकुसुमा-रोप*B3b*णकारणस्य च[४]। केत(का)धानस्तु सौन्दर्यातिशयाद्दुःसहत्वेनापि

1. B omits this line
2. A प्रोच्छायति
3. A, B पाठ्यान्तरम्
4. B omits च

कार्यवशात्कथमपि केना(पि) प्रकारेणाग्रत: स्थित्वेत्यर्थ:। अथवा के जले तत्र जीवति केतका मत्स्या:। तासामाधानं गर्भस्तस्य हेतु: कारणं यस्य। तथा च एकाक्षरकोषे। "कं शिरो जलमाख्यातमि"ति। अन्तर्वाष्प: धैर्यातिशयादन्तर्मध्ये संभृता श्री:। पुनर्मेघदर्शनादेव तस्य चिन्ताभूतेत्याशङ्क्य इदमुक्तम्। मेघस्यालोकेत्यादि। मेघस्य आलोके दर्शने सति सुखिनोऽपि सस्त्रीकस्यापि जनस्य चेतश्चित्तमन्यथावृत्ति: मदनचञ्चलं भवति। व्याकुलं भवति। अन्यथा वृत्तिर्यस्य तत्तथा। कण्ठाश्लेषप्रण(यिक)जने। कण्ठे आश्लेषेणालिङ्गनेन प्रणय: प्रेम यस्य। ईदृशे जने दूरसंस्थे किं पुनर्न भवति। अपि तर्हि भवत्येव। एतादृशविरहिणो जीवनमाश्चर्यम्। तदुक्तम् -

कामं कर्णकटुकृतोऽतिमधुरं केकारव: कोकिलान्।
मेघाश्चामृतवारिणोऽपि विहिता: प्रायेण ता: स्पर्द्धिन:।।

उन्मीलनावस्था इति परिमल: सह्योप्यसह्यायते। तत् किम्। तद्विपरीतमत्र न कृतम्। त्वद्विप्रयोगेन मे इति।।३।।

४. **प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रै: कुटजकुसुमै: कल्पितार्घाय तस्मै
प्रीत: प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।४।।

A3a, *B4a* प्र(त्या)सन्नेति। स यक्ष: प्रीत: सन् लब्धपूजातिथित्वा(त्त)स्मै मेघाय स्वागतं कुशलं तव इति व्याजहार। पृष्टवान्। तस्मै इति क्रिय(मा)णमपि कर्त्तव्यमिति। संप्रदाने चतुर्थी। किंभूतम्। प्रीतिप्रमुखवचनं प्रीतिरेव[१] प्रमुखं प्रीतिप्रसाधनं[२] वचनं यत्र तत्तथा। किंभूताय मेघाय। कल्पितार्घाय। कल्पितोऽर्घस्तु। पूजास्तस्मै। कै:। कुटजकुसुमै: गिरिमल्लिकाकुसुमै:। किंभूतै:। प्रत्यग्रैरभिनवै:। तथा च। "प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नव:"। इत्यमर:। किं करिष्यन्। स्वस्य प्रसूतां कुशलमयीम्। कुशलप्रवृत्तिम्। आत्मशुभात्मिकां वार्त्तां हारयिष्यन्। केन जीमूतेन मेघेन। किंभूताम्। दयिताजीवितालम्बनार्थाम्। दयिताया: जीवित(स्या)वलम्बनं धारणमेवार्थ: प्रयोजनं यस्या:। कस्मिन् काले। नभसि श्रावणे प्रत्यासन्ने। सन्निहिते। तस्मिन्।।४।।

---

1. **B** प्रीतिप्ररेव
2. **B** साधनम्

५. **धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणा-श्चेतनाचेतनेषु।।५।।

धूमेति। गुह्यको यक्षस्तं मेघं ययाचे। निधिं रक्षन्ति ये यक्षास्ते गुह्यकसंज्ञिताः इति [विश्वः]। {अथ}[१] क्व। धूमश्च तेजोऽग्न्यादेः प्रभावं च सलिलं च मरुच्च तेषां सन्निपातो मेलकमात्रं मेघः। कथम्। सन्देशार्थाः। सन्देशवाक्या *B4b* नि। कां सन्दिश्यन्त इति सन्देशाः। कर्मणि घञ्। ते च तत्र। अर्थात् श्रुतिविग्रहः। किंभूताः। प्राणिभिर्मनुष्यैः। प्रापणीयाः। नेतव्याः। किभूतैः। पटुकरणैः। पटु कर्मकोविदं करणमिन्द्रियं येषाम्। यैः। तत्र तथा। "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपी"ति [अमरः] । कदाचिदपि सम्बन्धोऽस्तीत्यर्थः। किं कुर्वन् इति। अमुमर्थम्। औत्सुक्या(दिष्टार्थोद्युक्तत्वा)न्न मरणजनितप्रियादर्शने भव्या तु। सोत्कण्ठतया अपरिगणयन्। अविगणयन्। कथम्। पुनः। सोत्कण्ठत्वेन असौ न गणितवानित्यर्थ आह। कामेति हि। यस्मात्। कामार्त्ताः। कामेन परिपीडिताः जन्तवः। चेतना(चे)तनेषु प्रकृत्या स्वभावेन कृपणाः। असमर्था भवन्ति। अयं चेतनः सन्देशयोग्यः। अयमयोग्यः। एतद्धि च (ते)षु योग्यो न भवति। अतो मेघं याचितवानित्यर्थः। अथवा चेतनाचेतनेषु याच्ञा दैन्यवन्तो भवन्तीत्यर्थः।।५।।

६. **जातं वंशे भुवनविदिते पुष्करावर्त्तकानां**
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।६।।

A3b मेघं प्रोत्सा(हय)न्। अ(त्र) हे(तुमा)ह। (जा)तमित्यादि। त्वां पुष्करावर्त्तकानां पुष्करवर्षिणां[२] मेघानां वंशे जातं उत्पन्नमहं (जाना)मि। किंभूते वंशे। भुवनेषु विदिते। लो*B5a*केषु प्रसिद्धे। किंभूतः मघोनः। इन्द्रस्य प्रकृतिपुरुषं चिदात्मपुरुषम्। किंभूतं कामरूपम्। स्वेच्छाचारिणम्। यस्मात्त्वं हि त्वयि मेघे गतः प्राप्तः। किंभूतः। विधिवशाद्दूरबन्धुः। विधेर्दैववशात्। अधीनात्। दूरे बन्धुर्दयिता यस्य स तथा। (याच)के महत्त्वाभावस्य। किं फलमित्यादि। याच्ञेति। अधिगुणे। अधिकगुणे पुरुषे निष्फलापि याञ्चा वरं श्रेष्ठा। अधमे

1. **A, B** अत्र
2. **B** पुष्पाम्बुवर्षिणां

हीनपुरुषे याञ्चा लब्धकामा सति न वरं न श्रेष्ठा इत्यर्थः। लब्धः प्राप्तः कामोऽभिलाषो यस्यां सा तथा। काममनसोस्तुम इति मकारलोपः। लब्धकामेति पाठान्तरं पूर्ववदेव। वंशशब्दात्पञ्चमी। यतो जनिकर्त्तुः प्रकृतिरित्यत्र सन्निहितानां प्रकृति(र)पेक्षतेऽत्र व्यव{हर्त्तृ}[1] त्वं वंशस्येति। पुष्पाम्बुवर्षिणो मेघाः पुष्करावर्त्तकादय इति। पुष्करावर्त्तका प्रधानभूता बहवो मेघा इति बहुवचनम्। यदुक्तम् -

''पुष्करावर्त्तपङ्काङ्ककालकान्तिजलप्लवाः।
इति वारिमुचां वंशाश्चतुर्द्धा परिकीर्त्तिता।।''विष्णुपुराणम्.इति।।६।।

७. **संतप्तानां त्वमसि शरणं तत्पयोद ! प्रियायाः**
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या।।७।।

संतप्तानामिति। हे पयोद ! हे मेघ ! संतप्तानां संतापयुक्तानां यस्मात्त्वं शरणमसि। जलदानेन संतापा*B5b*द्रक्ष्यसि। तत्तस्मान्मे मम प्रियायाः सन्देशं हर नय। अतो ममापि प्रियाविरहसंतप्तस्य सन्देशदानेन रक्षको भवेदिति। किम्भूतस्य मेघस्य। धनपतिक्रोधविश्लेषितस्य। धनपतेः कुवेरस्य क्रोधेन विश्लेषितस्य वियोगं कारितस्य। एतेनाहमपि संतप्त इत्यर्थः। तव प्रिया कुत्र तिष्ठति इति। को देशो मया गन्तव्य इत्याह। गन्तव्येति यया इश्वर इव कुवेरानुचरत्वात्तेषां वसतिर्निवासभूमिः। सर्वसुखास्पदत्वादलकेति प्रसिद्धा नगरी ते त्वया गन्तव्या। वा{च्या}[2] कर्त्तरि केवल इति षष्ठी। तत्र मम प्रिया तिष्ठति। इति तच्चिह्नमाह। बाह्ये बहिर्भूते उद्यानेति पवने निर्गममार्गे च[3] स्थितो यो हरस्तस्य शिरश्चन्द्रिकया धौतानि निर्मलीकृतानि हर्म्याणि यस्याः सा तथा। एतेन मम संदेशमन्तरेणापि त्वयावश्यं (तत्र) गन्तव्या। यतोऽलकायां (मार्गे स)न्महेश्वरनमस्कारोद्यम इति भावः।।७।।

८. **त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः**
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः।।८।।

1. **A, B** हित
2. **A, B** च
3. **B** omits च

*A4a*त्वामारूढमित्यादि। हे मेघ ! पवनस्य पदवीमारूढमाकाशमार्गात् हि त्वां दू(रे स्थि)तत्वात् पथिकवनिता: पथिकानां स्त्रिय:। प्रेक्षिष्यन्ते। द्र*B6a*क्ष्यन्ति। किंभूता:। उद्गृहीतालकान्ता:। उद्ध्वींकृतोऽलकान्तो याभिर्विरहेण संस्काराभावात् लम्बालकतया द्रष्टुमशक्यत्वात्। पुन: किंभूता:। प्रत्ययादाश्वसत्य:। प्रियागमनविश्वासादाश्वसत्य:। आश्वासं कुर्वत्य:। न नु (प्रिया)गमने प्रियलोक:। (आ)त्मविश्वासहेतु:। तासां भवतीत्यादि। क इत्यादि। त्वयि सन्नद्धे[1] वृष्ट्या सुसज्जिते सति विरहेण विधुरां विक्लवां जायां प्रियस्यानन्दजनितायैव तां उपपन्नां कान्तां क: पुमानुपेक्षेत। त्वया कथमुपेक्षिता इत्याह। नेति। अन्योऽपि जन:। अहमिव पराधीनवृत्ति:। परस्याधीनाय आवृत्तिर्वर्त्त{ना}[2] यस्य सस्तथोक्त:। यथाहं पराधीनवृत्ति: तथान्यो जनो न विदित इत्यर्थ:। त्वया स्वकान्ता{म}वधारयामि[3]। अन्यस्तु अहमिवेति। किं त्वं हि स्वतन्त्र एवेति।।८।।

९. **मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां**
वामश्चायं नदति मधुरं चातकस्ते सगर्व:।
गर्भाधानक्षमपरिचयान्नूनमाबद्धमाला:
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाका:।।९।।

मन्दं मन्दमिति। अनुकूल: पृष्ठानुवर्त्तिवातो यथा येन प्रकारेण मन्दं मन्दं शनैश्शनैस्त्वां नुदति प्रेरयति। तथायमपि चातक: पक्षी। तव वामस्थो मधुरं यथा स्यात्तथा नदति कूजति। किंभूत:। सगर्व: सदर्प:। जलाकांक्षित्वात्तथा नूनमु*B6b*त्प्रेक्षते। गर्भस्याधाने क्षमो योग्यो य:। परिचय: परिशीलनम्। तस्माद्धेतोरावद्धा घटिता मालापंक्तिभि: याभिस्ता बलाका:। नयनानां सुभगं प्रीतिक(रं) आकाशे त्वां सेविष्यन्ते। मेघदर्शनात्बलाकानां गर्भो भवति। अस्य भाव: यात्रासमयेऽनुकूलवातादिवहने तवाविघ्नेन गमनं भविष्यति। चातकपक्षे। चातकोऽपि शुभशंसितम्। यथा -

"वामे मधुरवाक् पक्षी वातश्च सू(च)यन् शुभ:।
निवेदयति गन्तारं यात्रायां शुभमुत्तममिति।।"

---

1. A omits सन्नद्धे
2. A, B आवृत्तिर्वर्त्तनं
3. A, B स्वकान्तावधारयामि

अत एव मधुकरमु(क्त)म्। बलाकापंक्तेः बलाकानां पंक्तिः। नायिकापक्षे से(वा)सं(भो)गमनास्रक्।[1] मेघो गर्भाधानक्षमपरिचयो नयनानन्दकरश्च। नायिकापि तथा। एतेन मदीयं कार्यमभिभविष्यतीति ज्ञायते इत्याह। यदुक्तम् -

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।

उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।। [काव्यादर्शः २.२३४.]।।९।।

१०. **तां चावश्यं दिवसगणनातत्परामेकपत्नी-**

मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।

आशाबन्धः कुसुमसदृशं प्राय{शो}[2] ह्यङ्गनानां

सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि।।१०।।

*A4b*तां (चावश्य)मि(ति)। हे मेघ ! अविहतगतिः सन् तां च मम पत्नीं त्वमवश्यं द्रक्षसि। ननु यत्र (प्रो)षितभर्त्तृका सा कथं द्रष्ट्र(व्या) (इ)त्याह। भ्रातृजायाम्। अहं तव ज्येष्ठ(भ्राता)। अतः सा दर्शनयोग्या इत्यर्थः। (त्व)द्विरहेण सा कथं जीवतीति। (कथं) ज्ञा(य)त इत्याह। अव्यापन्नां जीव{न्तीम्}[3]। ननु त्वद्वियोगेषु पुरुषान्तरानुरक्ता[4] वा स्यादित्याह। एकपत्नीं पतिव्रताम्। एकः पतिः यस्याः सा तथोक्ता। पति(व्रताम्)। कथमित्यारभ्य बहुव्रीहौ चेति। निपा(तना)दन्ते*B7a*नकारः। तर्हि कथं जीवतीत्याह। दिवसगणनातत्परां भर्त्तरि प्रोषिते इ(ति)। (य)तो दिवसा गता इति गणनायाम्। आसक्ताम्। ननु अ(व्या)पन्नामिति निर्द्धारयितुं न शक्यते। यदुक्तम् -

"किं (च) तव (यत्) वक्तव्यमनुरागविजृम्भि{तम्}[5]।

त्यजन्ति तु तावत् प्राणान् वियोगमसहिष्णवः।। इति।"

नैवमित्याह। आशाबन्ध इति। हि यस्मादाशाप्रत्याशाबन्धः वियोगो विरहेऽङ्गनानां स्त्रीणां हृदये प्रणयिस्नेहम्[6]। सद्यः पाति। तत्क्षणपतितुं शीलमस्य। प्राय{शो}[7] बाहुल्यात्तं

---

1. **B** omits from अत एव to मनास्रक्।
2. **A** प्रायसो
3. **A, B** जीवतीम्
4. **B** पुरुषान्तरासक्ता
5. **A** ताः
   B worm-eaten
6. **B** हृदयं प्रणयि। सस्नेहि
7. **A, B** प्रायसो

रुण{द्धिः}[1]। आवृ(णा)ति। अत एव कुसुमसदृशं कुसुमाकार(मित्य)र्थः। आशाबन्धो मर्कटपाशः। प्रणयि प्रीतिकारकम्। सद्यःपाति कुसुमं वियोगे वृक्षात् पतने रुणद्धि। तथैतदपि बोद्धव्यः। पूर्वत्र आशाबन्ध आश्वासः। तथा विश्वप्रकाशे - "आशाबन्धः समाश्वासे तथा (मर्कट)पाशके।" इति।।१०।।

११. **कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रां**
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।
आकैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः।।११।।

नन्वेकाकि(नो) गमनमनुचितम्। यदुक्तम् -

"पञ्चभिः सह गन्तव्यं *B7b*स्थातव्यं पञ्चभिः सह।
पञ्चभिः सह भोक्तव्यं न दुःखं पञ्चभिः सह।।"

सत्यम्। यात्रानुकूल्यात् सहाया भविष्यन्तीत्याह। कर्त्तुमिति। हे मेघ ! नभसि। आकाशे। राजहंसाः आकैलासात्। कैलासपर्यन्तं भवतः सहायाः सम्पत्स्यन्ते। भविष्यन्ति। न केवलं बलाकास्तावत् सेविष्यन्ते इत्यर्थः। वर्षागमे राजहंसानां वार्त्ता। यदुक्तम् -

''त्यक्तान्यरागा {इव}[2] मानसोत्काः।
हंसा नदन्मेघभयाद् द्रवन्ति।।'' इति। [घटकर्परम्]

किंभूता(:) मानसोत्काः। मानसनाम्नि सरसि सोत्कण्ठा उत्सुकाः। एतावद्दूरं केन सम्बलेन गमिष्यन्तीत्याह। बिसेत्यादि। बि{स}स्य[3] मृणालस्य कि{स}लयं[4] तस्य च्छेदः खण्डः। स एव पाथेयं पथियोग्यसम्बलं भवति। एतेन अन्यत्र सम्ब(ल)दानव्यग्रता न भविष्यतीत्युक्तं भवति। किं कृत्वा। ते तव तद्गर्जितं श्रुत्वा। किंभूतम्। श्रवणस्य सुभगम्। तदिति किम्। यद्गर्जितं महीं पृथ्वीम् उच्छिलीन्ध्रातपत्राम् उद्गतगोमयकोषात्कोसित-पत्राम्। कर्त्तृको भवति। समर्थो भवति। उद्गतानि शिलीन्ध्राणि च्छत्राण्येव[5] आतपत्राणि यस्याः।।११।।

---

1. **A** द्धिः
   B worm-eaten
2. **A, B** न्तिग
3. **A, B** बिशस्य
4. **A, B** किशलयं
5. **B** शिलिन्ध्राण्येव

१२. **आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्गच्य शैलं**
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्।।१२।।

*A5a*आपृच्छस्वेति[1]। हे मेघ ! अमुं शैलं रामगिरिमालिंग्य क्रोडीकृत्वा पृच्छस्व। सुखमास्ताम्। *B8a*आङिनुप्रच्छ्योरित्यात्मनेपदम् [वा.१/३/२१]। किंभूतम्। तुङ्गमुन्नतम्। पुनः किंभूतम्। मेखलासु मध्यभागेषु। रघुपतेः श्रीरामस्य पदैः पादचिह्नैरङ्कितम्। किंभूतैः। पुरुषाणां वन्द्यैः। वन्दनीयैः। पुनः किंभूतम्। प्रियसखम्। परमप्रियम्। प्रियसखपक्षे तुङ्ग्ये महानुभावाः। रामपादाङ्कितत्वेन वैष्णवत्वाद्धार्मिक इति सदृशी मैत्री। यदुक्तम् - "सदृशी शोभते मैत्री"ति। ननु प्रियसखत्वे हेतुमाह काल इति। काले काले प्रतिसमयं भवतस्तमेव मेघसंयोगमेत्य प्राप्य यस्य रामगिरेः स्नेहस्य जलदा(नं) स्निग्धस्य मनोहरकारणे(न) अभिव्यक्तिर्भवति। किंभूतस्य। चिरविरहाज्जातमुत्पन्नम्। अत एव उष्णं वाष्पमु(ष्मा)णं धूमाकारं मुञ्चत उद्वमतः प्रियसखपक्षे। स्नेहाभिव्यक्तिः। प्रेमावकाशः। तथा च। "{स्नेहः स्यात् पुंसि तैलादिरसद्रव्ये च}[2] सौहृदेऽपि चे"ति [मेदिनि]। वाष्पमश्रु। तथा च। "व्राष्पो नेत्रजलोष्माणोरिति" [विश्वः] ।।१२।।

१३. **मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं**
सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य।।१३।।

मार्गमिति। हे जलद! मम कथयतः सकाशात् मार्गं तावत् साकल्येन शृणु। किंभूतम्। तव प्रकृष्टगमनस्य योग्यम्। तदनु पश्चादनुक्तमपि संदेशं वार्त्तां श्रोष्यसि। किंभूतम्। श्रोत्राभ्यां पेयं साभिला*B8b*षं श्रवणीयम्। अपि (च)। यत्र यस्मिन् मार्गे खिन्नः खिन्नः क्लान्तः सन् शिखरिषु पदं न्यस्य आरोप्य तत्र विश्रम्य ग(न्ता)सि गमिष्यसि। तथा क्षीणः क्षीणः कर्षितः कर्षितः सन् उत्सृष्टजलत्वात् श्रोतसां प्रवाहजलानां अर्थान्नदीनां परि सम्यक् लघु{र्म}[3] नोज्ञं पयो जलं उप(यु)ज्य पीत्वा गन्तासि। तं मार्गं शृण्वित्यर्थः।

1. **A** आपृच्छेति
2. **A, B** स्नेहस्तैलादिकरसंतव्ये स्यात्।
3. **A, B** म

लघुः क्षिप्रं वा। तथा च विश्वप्रकाशे - "लघुर्मनोज्ञे निःसारे गुरुषु प्रथितो लघुः। कृष्णा गुरुणि शीघ्रे च पृच्छायां क्षिप्रता लघ्वि"ति।। कथयत इति आख्यातोपयोगेति पञ्चमी [अष्टाध्यायी] ।।१३।।

१४. **अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-**
र्दृष्टोच्छ्रायश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्।।१४।।

*A5b*अद्रेः शृङ्गमिति। भो मेघ ! अस्मात्स्थानात्सरसः पल्लवमनोहरः निचुलो यस्मिन्। तस्मात्। "सरसः क्षीरवान् वृक्षः यात्रिकः परिकीर्त्ति{तः}[1]।" उदङ्मुखः उत्तराभिमुखः सन् खमाकाशमुत्पत उत्तिष्ठ। किं कुर्व(न्)। पथि मार्गे। दिशां नागानामैरावतप्रभृतीनां गजानाम्। स्थूलाः वृहतो ये हस्तास्तेषामवलेपान् च[२] प्रहारान् त्यजन्। तर्हि गर्जितश्रवणेन रोषात् स्थूलहस्तावले(पा)न् कुर्वन्ति। "अ(ग्र)हस्तात्पर स्थू(ल)हस्त" इति हस्तिशि{क्षा}[३] वदति। "स्थूलहस्तानामवलेपो गर्वः।" तथा च विश्वप्रकाशः। "अवलेपस्तु गर्वे स्याल्लेपने*B9a* भूषणेषु वा" [विश्वः]। पुनः किंभूतः। मुग्धाभिर्नवयौवनाभिः सिद्धाङ्गनाभिश्चकितचकितं सभयमिव यथा स्यात्तथा। दृष्टोच्छ्राय दृष्ट उच्छ्रायो यस्य स तथा। पुनः[४] किंभूताभिः। (अ)द्रेः पर्वतस्य शृङ्गम् (प)वनः हरति। किंस्विद्वित(र्के)। उन्मुखीभिरूद्धर्ववदनाभिः।।१४।।

१५. **रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-**
द्वल्मीकाग्रात्प्रभवति धनुष्खण्डमाखण्डलस्य।
येन श्यामं वपुरतितरां कान्तिमालप्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः।।१५।।

रत्नच्छायेति। हे मेघ ! पुरस्तात् पूर्वस्यां दिशि आखण्डलस्येन्द्रस्य एतत्प्रेक्ष्यम्। धनुष्खण्डं प्रेक्षणीयं दर्शनीयम्। येन धनुः खण्डेन ते तव श्यामं वपुः अतितरामतिशयेन कान्तिं शोभामालप्स्यते। प्राप्स्यते। केन कस्य इव। स्फुरिता दूरं प्रसूता रुचिः कान्तिर्यस्य

1. **A, B** त
2. **A** omits च
3. **A, B** खा
4. **B** किं पुनः

ईदृशेन बर्हेण मयूर{पि}[1]च्छेन गोपालरूपिण: विष्णोर्यथा श्यामं वपु: शोभते। तत्तन्मयूरस्य {पि}[2]च्छस्य ईन्द्रधनु: साम्यात् विष्णोर्मयूररुचित्वं प्रसिद्धमेव युक्तम्।

"बर्हापीडं नटवरवपु: कर्णयो: कर्णिकारम्।
विभ्रद्वास: कनककपिशं वैजयन्तिं च मालाम्।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै:।
वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्त्तिरिति।।"[3]

[श्रीमद्भागवतम् -१०.३०]।।

इति पुरस्तात्पूर्वस्यामित्युक्तम्। पूर्वदिग्वर्त्तिधनुरुदङ्मुखस्य मेघस्य दक्षिणपार्श्वत एव भवति। यात्रिकत्वात्। न तु पुरस्तादग्रत इति। तस्यायात्रिकत्वात्। यदुक्तम् - "अग्रतस्तु धनुष्खण्डम् ऐन्द्रं न शुभदमि*B9b*ति"।।१५।।

१६. **त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञै:**
प्रीतिस्निग्धैर्जनपदवधूलोचनै: पीयमान:।
सद्य: {सी}[4]रोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद व्रज लघुगतिर्भूय एवोत्तरेण।।१६।।

*A6a*त्वय्येति। भो मेघ ! मालं मालनामदेशसम्बन्धिक्षेत्रमारुह्य आक्रम्य तत्र वर्षिकत्वात् किंचित्पश्चात्पश्चिमं व्रज। किंभूत:। भूय एव पुनरपि किंचिदुत्तरेण व्रजतीति सम्बन्ध:। वायुकोणेन वात्यर्थात्। अपू(र्वे) (ए)व शब्द:। किं(भू)त: सन्। लघुरल्पगमन:। (प्र)थ(म)गमनप्रस्थाने स्तोकग(म)नं युज्यते। किंभूतम्। सद्य: {सी}[7]रोत्कषणसुरभि(:)। सद्यस्तत्क्षणं {सी}[5]रेण लाङ्गलेन उत्क{र्ष}[6]णमुत्पाटनं तेन सुरभिर्मनोहरम्। तथा (च)। "सुरभिर्ग{र्वे}[8] चैत्रे च सुगन्धे च मनोहरे। किंभूत:। अ(त)

1. **A, B** पु
2. **A, B** पु
3. **B** omits from रन्ध्रान् to कीर्त्तिरिति
4. **A, B** शी
5. **A, B** शी
6. **A, B** शी
7. **A, B** ष
8. **A, B** र्व

(ए)व जनपदवधूलोचनैः पीयमानः। जनपदानां वध्वस्तासां लोचनैश्चक्षुभिः सादरमवलोकमा(न)ः। कुत इत्याह। त्वयि आयत्तमधीनं कृषेः फलं सस्यादिसम्पत्तिरिति हेतोः। किंभूतैः। अत एव प्रीत्यानुरागेण स्निग्धैर्मनोहरैः। पुनः किंभूतैः। भ्रूविकारानभिज्ञैः भ्रूविक्रियायामकुशलैः। (भ्रू)क्षेपो यथा।

"भ्रूक्षेपः पातनं चैव भ्रूकुटी चतुरं भ्रूवोः।
कुपितं रेचितं चेति सहजं चेति सप्तधा" ।।१६।।

**१७. त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमांश्चित्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।।१७।।**

त्वामासारेति। भो मे(घ) ! (त्वमे)व ध*B10a*{न्यः}[1]। (स) सानूमा(न्) पर्वतः। त्वां सा(धु यथा) स्यात्तथा मू(र्ध्ना) (म)स्त(काव)नतोऽर्थः। शृङ्गेण वक्षति। धारयिष्यति। तस्य शिखरे (वि)श्रमिष्यतीति यावत्। किंभूतम्। आसारेण धारावृष्ट्या प्रशमितो नाशितो वनानामुपप्लवोऽग्न्यादिकं यस्य पर्वतस्येत्यर्थात्। पुनः किंभूतम्। अध्वनि मार्गे श्रमं खेदं परिगतः प्राप्तः। इति मेघस्योत्कर्षः। चित्रकूट इति निवासो चित्रवासकल्प इति सूच्यते। ननु तथापि कथं मां शिरसाऽवश्यं वक्षतीत्याह नेत्यादि। प्रथममाद्यं यत्सुकृतं शोभनकरणं तस्यापेक्षया संश्र(या)य (वि)श्रमणार्थं मित्रे प्राप्ते आगते सति क्षुद्रोऽपि अधमोऽपि विमुखो न भवति। यः पुनस्तथा तादृश उच्चैर्महानुभावः स किं विमुखो भवति नैवेत्यर्थः। "क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यत्वादि"ति [नानार्थाभिधानम्] ।।१७।।

**१८. अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघ्यमानः।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु।।१८।।**

*A6b*अध्वक्लान्तमिति। भो मेघ ! भो जलद ! आम्रकूटो नाम पर्वतस्तुङ्गेन उन्नतेन शिरसा त्वां वक्षति। किंभूतम्। अध्वक्लान्तं अध्वनि मार्गे प्राप्तं खेदम्[2]। पुनः किंभूतम्। प्रतिमुखगतम् अभिमुखोपस्थितम्। किंभूतः। श्लाघ्यमानः। प्रशंसां कुर्वाणः।

1. **A, B** न्य
2. **A** खिन्नम्

वि(प्र)*B10b*तिकारोऽयं प्रत्युषोऽध्वक्लान्तो मदीयं स्थानमागत इति त्वामात्मानम्मन्यमानः। भो जलद ! तस्य नैदाघमग्निं ग्रीष्मप्रभवसंतापमासारेण धारावृष्ट्या त्वमपि शमयेः शमिष्यसि। न च तेनाहमुपकृत्ये तावता ममार्थकं स देवोपकर्त्तव्य इत्या(श)ङ्क्य उ(पपत्ति)माह। यतो यस्मान्महत्सु भवद्विधेषु उपकारः क्रियते स अचिरेण फल(ति)। अपि तर्हि शीघ्रमेव फलति। किंभूतः। सद्भावार्द्रः सद्भावेन शोभनभावेनातिशयेन सततं हृदयवन्तत्वादार्द्रः। अनुजात योऽथ आदिशत इत्यशीघ्रमेव फलति। पूर्वश्लोके आश्रयेन्म{हात्म}[१]ना मेघेन उपकारे कृते आश्रयभूतस्य पर्वतस्य प्रत्युपकारः प्रतिपादितः। इह तु आश्रयभूतेन पर्वतेन उपकारे कृते आश्रितस्य मेघस्य प्रत्युपकारः कथितमिति पूर्वापरयोः श्लोकयोरत्र भेदमिति। मित्रपक्षे तुङ्गेन सानु[२]वत्तेन। सानुमान् शब्दः प(र्व)तपर्यायः। यदुक्तम् - "सानुमान्निति भोरगिरीति"।।१८।।

१९. **छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-**
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः।।१९।।

छ(न्ने)ति। (भो मे)घ ! त्वयि मेघे शिख*B11a*रमारू(ढे) सति आम्र(कू)टनामा(च)लः। अमरमिथुनप्रेक्ष(णी)यां देवानां स्त्रिपुंसयुगलैः प्रेक्षणीयां[३] कृतसुकृतमनस्तया साभिकांक्षदर्शनीयामवस्थां नूनं निश्चितं यास्यति। गमिष्यति। किंभूते। स्निग्धकेशे वर्णे स्निग्धया अतिचिक्कणया वेण्या केशविशेषा सवर्णे समानकाये। किंभूतोऽसौ अ(च)लः। छन्नोपान्तः। छन्नः उपान्तो यस्य स तथा। कैः काननाम्रैः। वनरूढैः। किंभूतैः। परिणतफलद्योतिभिः। परिणतैः पक्वैः फलैः कृत्वा द्योतिभिः दूरं प्रकाशनशीलैः। उपमानमाह। मध्ये इति। भु(वः पृथि)व्याः स्तन इव। किंभूतः। मध्ये श्यामः। कृष्णः। स्तनोऽप्यचलः श्यामवर्णी{यः}[४]। स्तनयोर्मध्ये श्यामः। शेषे मध्यादन्यविस्तारे परि(णाहे) पाण्डुः। कृष्णश्च यौवनात् अचलोऽपि शिलामयत्वात्। मध्ये श्यामः। उपमाना(धि)गतस्यापि शिलामयत्वं लभ्यते। आम्रैरूपान्ते पाण्डुः। मेघयोः पादाग्रे कृष्ण इति श्यामात् वाक्यार्थोपमा।

---

1. **A, B** हत्सु
2. **A, B** नो
3. **B** omits देवानां स्त्रिपुंसयुगलैः प्रेक्षणीयां
4. **A, B** या

"वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते।

एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधा"। [काव्यादर्शः २.४३] इति।।१९।।

२०. **स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्त्तं**
तोयोत्सर्गाद्रुततरगतिस्तत्परं वर्त्म तीर्णः।
रेवां द्रक्षस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य।।२०।।

*A7a*स्थित्वेति। भो *B11b* मेघ ! वनचराणां श(व)राणां वधूभिः व(नि)ताभिः भुक्त उपभुक्तः कुटजजनितसुखं यस्मिन् ईदृशे तस्मिन् आम्रकूटे मुहूर्त्तं स्थित्वा विश्रामतत्परं तस्मादनन्तरं वर्त्म तीर्णः मार्गगतः सन् रेवां द्रक्षसि। किंभूतः सन्। उक्तक्रमेण तोयस्योत्सर्गाज्जलस्य त्यागात्हेतोः। द्रुततरगतिः प्रकृष्ट(वे)गे गमनः सन्। किंभूताम्। विन्ध्यपर्वतस्य पादे विशीर्णां खण्डखण्डीभूतां। स्वच्छतया रमणीयदर्शनाम्। श्रमापनोदनिमित्तत्वात्। किंभूते। उपलैः पाषाणैर्विषमेऽसमे। क इव। भक्तीति। ग(ज)स्याङ्गे भक्तिच्छेदैः लेखाविभागस्य च्छेदैः[1] कौटिल्यरचनाप्रकारैः। विरचितां कृतां भूतिं गजमण्डनमिव।।२०।।

२१. **तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।।२१।।

तस्येति। हे मेघ ! हे घन[2] ! वान्तवृष्टिरुद्गीर्णतोयस्त्वम्। तस्याः रेवायास्तोयं जलमादाय गृहीत्वा। गच्छेः। गमिष्यसि। किभूतम्। तिक्तैः सुगन्धिभिः। वनगजानां मदैर्दानवारिभिर्वासितं सुगन्धिकृतम्। तथा च। "रसे तिक्तं सुगन्धौ च" [विश्वः]। इति। अथवा। नो मुस्तकगजो नागकेशरः। मदः कस्तुरि वा। एभिस्तिक्तैः[3] सुगन्धिभिर्वासितम्। तथा च। वनं वने। मुस्तके स्याद्गिलोऽपि नाग*B12a*केशरः। (म)दः कस्तुरिका। एभिर्वासितमिति सर्वज्ञमतमेतत्। ननु खर(त)रप्रवाहत्वात् कथं तोयं ग्राह्यमि(त्या)ह। जम्बुकुञ्जप्रतिहतरयम्। जम्बुकुञ्जे प्रतिहतो रयो वेगः प्रवाहो[4] यस्य स तथा। ननु

1. **B** omits लेखाविभागस्य च्छेदैः
2. **B** omits this हे घन
3. **B** एभिः स्तिक्तैः
4. **B** omits प्रवाहो

लघुतया शीघ्रगमनमेवोचितम्। किं रेवाजलग्रहणेनेत्याह। अन्तरिति। हे घन ! हे मेघ ! अनिलः पवनोऽन्तर्मध्ये सारो जलं यस्य ईदृशं त्वां तुलयितुं संक्रमयितुं न शक्यत। न समर्थो भविष्यति। कुत इत्याह। हि यस्मात्। रिक्त(:) स्वच्छः सर्वो ल{घु:}[1] भवति। पूर्णभावस्यान्तरपूर्णमध्यता गौरवाय गौरवनिमित्तं भवति। अर्थः कश्चित्धनादिशून्यो लघु अनादरपात्रम्। पूर्णता धनादिसंभावितत्वं गौरवाय गौरवार्थं भवति। अर्थान्तरन्यासोऽयम्। यदुक्तम् - "ज्ञेयः सोऽन्योऽन्यस्य वस्तुन"[2] इति।।२१।।

२२. **नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढै-**
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
शारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्।।२२।।

*A7b*नीपमिति। हे मेघ ! शारङ्गाश्चातकास्ते तव मार्गं सूचयिष्यन्ति। अनुचरिष्यन्ति। लिङ्गैरन्वेषणमनुसरणम्। किमत्र लिङ्गमित्यपेक्षायां हेतुगर्भ-विशेषणमाह। जलेति। जलस्य लवं कणं मुञ्चतीति क्विप्। तस्य मार्गं जललवैर्लक्षि*B12b*तत्वात् ज(ल)लवप्रीत्याशयानुसरिष्य(ति)। अथवा जललवेन प्रीतास्सन्तः। अनेन यथा गच्छेदिति अग्रतो भूत्वा कथयिष्यन्ति चेत्यर्थः। किं कृत्वा। नीपं कदम्बं दृष्ट्वा। किंभूतम्। अर्द्धरूढैरर्द्धजातैः केशरैर्हरितं श्यामं कपिशम्। तदर्थादभिनवम्। कदम्बमत्र लिङ्गम्। पुनः किमपरं दृष्ट्वाऽनुकच्छं कच्छसमीपे। कन्दलीश्च दृष्ट्वा। किंभूताः। आविर्भूतमुत्पन्नं प्रथमं मुकुलमिषद्विकसितं कुसुमं यासां तास्तथा। कन्दल्यत्र चिह्नम्। पुनः किं कृत्वा। दग्धेष्वरण्येषु (उर्व्याः) पृथिव्याः अधिकसुरभिम्। तव जलपातातिं(शयं) मनोहरं (ग)न्धमाघ्राय। पृथिवीगन्धोऽत्र लिङ्गम्। एतेन सर्वोपकारत्वमिति व्यज्यते। अथवा "शारङ्गः शवलेऽपि चे"ति [वैजयन्ती]। कच्छ इति। नद्याद्युपान्तदेशस्तु कच्छो बहुजले मत इति। "सुरभिर्ग{र्वे}[3] चैत्रे च सुग(न्धे) च मनोहर" इति। "शारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे" [विश्वः]।।२२।।

२३. **अम्भोबिन्दुग्रहणरभसांश्चातकान् वीक्षमाणाः**
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।

---

1. **A, B** घु
2. It may be "ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन। तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः।।" (काव्यादर्शः २.१६९)
3. **A, B** र्वे

त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि।।२३।।

अम्भेति[१]। भो मेघ ! सिद्धाः सिद्धपुरुषाः प्रियाणां प्रेयसीनां सहचरीणां रागातिशयादल्पमपिकालं न परित्यजन्तीनाम्। संभ्रमेण मेघध्वनिभीतित्वं त्वया आलिङ्गितानि स्तनितस्य गर्जि*B13a*तस्य सम(ये) प्रा{ये}णासाद्य[२] प्राप्य त्वां मानयिष्यन्ति। त्वत्प्रसादादेव कम्पितभीतिचमत्कारिकामिन्यालिङ्गितानि प्राप्तान्यस्माभिः हृष्टाः सन्तः सिद्धास्त्वां पूजयिष्यन्ति। प्रशंसयिष्यन्तीति यावत्। अत एव गर्जि(त) श्रवणत्रासात्सोत्कम्पानि उत्कम्पसहितानि। सं(भ्रम) इति। उद्वेगः संभ्रमः[३] प्रोक्तः। प्रियाप्रियसमागम इति। कम्पसंभ्रमाभ्यां नायिकायाः सुरतसमाप्तिसुखं सूचितम्। यदुक्तम्-

"रोमाञ्चो वेपथुः स्वेदो ललिते च विरेचने।
मज्जन्त्या इव गात्रेषु संश्लेषस्तृप्तिलक्षणमिति।।"

सोत्कम्पानीति। रागद्वेषभयादिभ्यः कम्पो गात्रस्य वेपथुरिति। किंभूताः। चातकान् वीक्षमाणाः। साकांक्षमवलोकमानः। किंभूतान्। अम्भसो जलस्य ग्रहणे पाने रभसो हर्षो येषां ते तथा। "रभसो हर्षवेगयोरि"ति [मेदिनि]। किंभूताः। परिगणनया परिसंख्यया एतावत्य एता इति बलाकाः कर्मभूताः निर्दिशन्तः। प्रेयसीभ्यः कथयन्तः। किंभूता बलाकाः। श्रेणीभूताः। अश्रेणयः श्रेणयो भूताः श्रेणीभूताः पंक्तीभूताः।।२३।।

२४. **उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं प्रियासोः**
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत्।।२४।।

*A8a*उत्पश्यामीति। भो सखे ! मत् प्रियार्थं ममोपकाराय प्रेयस्यर्थं द्रु(त)मपि शीघ्रमपि[४] *B13b* यियासोर्गन्तुमिच्छोस्ते तव पर्वते पर्वते प्र(ति)पर्व{तं}[५] कालस्य क्षेपं विलम्बमुत्पश्यामि। उत्प्रेक्षते। किंभूते। ककुभेन अर्जुनपुष्पेण सुरभौ। अतिरम(णी)ये।

1. B अम्भ इति
2. A प्राणासाद्य
   B आसाद्य
3. B स्तम्भः
4. B शीघ्रं मपि
5. A, B ते

"इन्द्रद्रुः ककुभोऽर्जुन" इत्यमरः । किं च। शुक्लापाङ्गैः मयुरैः केकात् सा या वाणीः स्वागतीकृत्य। सुखमागतं भवतेत्यादि प्रश्नं कृत्वा प्रत्युद्यातः। कृत्वाभ्युत्थानः[१] सन् भवानाशु शीघ्रं कथमपि मयोपरोधेन व्यवस्येत्[२] व्यवसायं कुर्यात्। किंभूतैः। सजलनयनैः। त्वद्दर्शनादानन्दाश्रु जलप्लुतं नयनं येषां ते तथा। ईदृशस्य देशस्य उद्दीपनहेतुत्वात्प्रीति-रुपजायते। यदुक्तम् -

"मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिः।
असंप्रयोगविषया सैव प्रीतिर्निगद्यते"।।[३] [भावप्रकाशनम् – २.२१]

मम हितकारिणा मित्रेण त्वया ईदृशमपि देशं परित्यज्य गम्यते। यदुक्तम् - "माता मित्रं पिता चेति त्रयं च हितकारणमिति।" अत एव सखेति सम्बोधने शुक्लापाङ्गो मयुरो स्यादिति। "अस्वागतं स्वागतं चे"ति च्वि।।२४।।

२५. **पाण्डु{च्छा}योपवनवृतयः[४] केतकैः {सू}चिभिन्नै[५]**
र्नीडारम्भैर्गृहब-लिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने फलपरिणतिश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायि-हंसा दशार्णाः।।२५।।

(पाण्डु)च्छायेति। हे मेघ ! (त्वय)यासन्ने निकटीभूते स(ति) दशार्णा जनपदाः सम्प (त्स्य)न्ते भ*B14a*विष्य(न्ति)। (ई)दृशी (पा)ण्डुः (छा)या कान्तिर्यस्याः ईदृ{शस्यो}[६]पवनस्य (वृ)त्तिरावरणं येषां ते तथा। अत्रापि त्व{य}यासन्ने[७] इत्यर्थः। कैः केतकैः। पुष्पैः। किंभूतैः। {सू}चि[८](भि)न्नैः। भिन्नाः विदीर्णाः विकसिताः {सूचयोऽग्रीणः}[९] येषां तैः। आहि(ताग्निरि)व भिन्नपदस्य परनि(पा)तः। {सू}च्या[१०] भिन्नैरिति वा।

1. **B** कृतात्वाभ्यूत्थानः
2. **B** व्यवस्येभ्य
3. The verse is in भावप्रकाशनम् as मनोऽनुकूलेष्वर्थेषु सुखसंवेदनात्मिका। इच्छा रतिः सा द्विधा स्याद्रतिप्रीतिविभागतः।।(२.२१) The first line is partially identical with the mss but the second line is not identical.
4. **A, B** पाण्डुछायोपवनवृतयः
5. **A, B** शूचिभिन्नै
6. **A, B** शान्त
7. **A, B** त्वयासन्ने
8. **A, B** शूचि
9. **A, B** सूचयो अग्रीणः
10. **A, B** शूच्या

पुनः किंभूताः। गृहस्य गृहि{ण्याः}[१] (सु)खाद्वलिम्। अशनोपहारभुजां तावद्बलिं भु{ञ्}जानाम्।[२] नीडस्य गृहस्यारम्भे सति आकुलाः संकुलाः ग्रामस्य चैत्या उद्देश{वृ}क्षाः[३] येषां ते तथा। गृहिणी गृह(मुच)यते। "उद्देशपादपे चैत्यः क्लीबमायतने पुन"रिति [रन्तिदेवः]। किंभूताः। पुनः। फलपरिणतिश्यामजम्बुवनान्ताः। फलपरिणत्या पाकेन श्यामः कृष्णो जम्बूनां वनान्तो यत्र ते तथा। अन्तशब्दः स्वरूपार्थः। अत एव कतिपयदिनानि अत्र स्थातुं शीलं येषां ते तथा।।२५।।

२६. **तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं**
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादुयुक्तं
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि।।२६।।

*A8b*तेषामिति। भो मेघ ! वेत्रवत्याः नद्याः पयो जलं प्राप्य। तीरोपान्ते समीपे स्तनितेन सुभगमाहरणीयं यथा स्यात्तथा पास्यसि। किंभूतं स्वादुयुक्तम्। स्वादु (स्वा)द्यमानम्। अतः[४] *B14b* युक्तम्। पानयोग्यम्[५]। पुनः किंभूतम्। चलाश्चञ्चला उर्मयो यस्याः सा तथा। किं कृत्वा। तेषां दशार्णानां राजधानीं कटकं गत्वा। किभूताम्। दिक्षु सर्वदिग्भागेषु प्रथिता विदिशेति लक्षणं नाम यस्याः {सा}[६] तथा। अत एव कामुकत्वस्यातिमहदतिशयविपुलं फलं प्रयोजनं लब्धा (प्रा)प्य। अत एव विदिशाया {अ}पि स्त्रीत्वमुपवर्णितम्। तथा वेत्रवत्याश्च नदीपक्षे। स्तनितं कलत्का{र}[७]शब्दः। नायिकापक्षे कण्ठकूजितम्। यदुक्तम्-

"भ्रमरस्या{न्तः}पुष्पस्य[८] हंसहारितयोस्तथा।
पारावतस्य लावस्य दा{या}दार्थे[९] ऋतानि च।।"
यत्रतो वदरस्येव जले च[१०] शब्दितं भवेत्। वंशसम्पूटतो वह्नौ तुरगस्येव ह्रेषितम्।।"

1. **A, B** ण्या
2. **A, B** भुजानां
3. **A, B** उद्देशकक्षो
4. **B** The second one handwriting is started after this word.
5. **A, B** पावनयोग्यम्
6. **A, B** तत्
7. **A, B** ल
8. **A, B** भ्रमरस्यान्यस्य पुष्पस्य
9. **A, B** दायदार्थे
10. **A** omits च

एवं[1] बहुविधान् शब्दान् कुर्वन्त्विति मनोहरान्। सुरतेर्भाव[2]मा(सा)द्य कामिनो रागबुद्धय:। मां त्यक्त्वा कुत्रान्यत्र स्थितोऽसीति मेघे भ्रूभङ्गि:। कोपनिषेधाय कल्पितं वचनं स्तनितम्। यतो मानिनीमुखचुम्बनं हठादपि क्रियते। यदुक्तम् -

"{उन्नमय्य}[3] सकच[4]ग्रहमास्यं चुम्बति प्रियतमे हठवृत्त्या।

मुञ्च मुञ्च मम नेत्रकल्पितां योषितां जय(ति) मानवतीनामिति" ।।२६।।

[शार्ङ्गधरपद्धति:]

२७. **नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-**
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पै: कदम्बै:।
य: पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि।।२७।।

निचैरिति। भो (मे)घ ! विदिशालक्ष(णां) नीचैरा(ख्या)सं ज्ञाय। स ई(दृ)शं गि*B15a*रिं (प)र्वतमधिवसे: वत्स्यसि। कुत:। विश्रामहेतो:। (उपा)न्वध्याङ्वस: [अष्टाध्यायी १.४.४८] इति (गि)रे: कर्मत्वम्। किंभूतमिव। त्वत्सम्पर्कात्। तव (स)मागमात् पुलकितमिव। हर्षेण रोमाञ्चितमिव। सत्पुरुषोऽयमस्मदीयं स्थानमागत इति मह(त्त्वा)त्। कै: कदम्बै:। किं(भू)तै: प्रौढपुष्पै:। प्रौढानि विकसितानि पुष्पाणि येषां तै:। तमिति गम्यम्। य: पर्वतशिलाभि: पाषाणगृहै:। नागराणां नगरभव{जना}नां[5] उद्दामानि स्वच्छन्दानि यौवनानि प्रथयति प्रकाशयति। किंभूतै:। पण्यस्त्रीणां वेश्यानां रतौ क्रीडायां यत् परिमलं सौगन्ध्यं तत् उद्गारयितुं शीलं येषां तानि तै:[6] इत्यर्थ:। नागरो यथा -

"नित्यस्निग्धसुगन्धाङ्ग: शृङ्गारमित्रवत्सल:। प्रौ(ढभा)वेङ्गितज्ञश्च (व)शी वाग्मी गुणप्रि(य):।

प्रवृत्तिकुशलो ह्येष[7] धर्मज्ञो धैर्यसागर:। चाटुकार: सभाकारो नागर: परिकीर्त्तित:।।"

---

1. **B** The first one handwriting is restarted from this word.
2. **B** सुरतोत्सव
3. **A, B** उन्नमय
4. **B** सचक
5. **A, B** नगरभवजनपदानां
6. **A** परिक्रीडायां परिमलता .का..त...मोत्कृष्टा सुगन्धि .. रुद्गारयति येषां तै
7. **A, B** येषां

*A9a*महार्ह(त्वा)दवस्थाभेदाद्वा यौवनानीति बहुवचनम्। आरभ्य षोडशाद् वा विंशवत्सरावधि यौवनं पुरुषाणाञ्च। तथा यौवनचेष्टितमिति। पुलकितमिति तारकादित्वादिति।।२७।।

२८. **विश्रान्तः सन्व्रज नगनदीतीरजातानि सिञ्च-**
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम्।।२८।।

*B15b*वि(श्रा)न्तेति। यत्र तादृशि (प)र्वते विश्रान्तः सन् व्र(ज) गच्छ। (किं) कुर्वन्। उद्यानानां {क्रीडावनानां}[१] यूथिकायाः कुट्मलानि मालिकाया{:} जालकानि। समूहान् सिञ्चन्। कैः। नवैर्जलकणैः। किंभूतानि। नगानां नदीतीरेषु जातानि। किंभूतः सन्। पुष्पलावीमुखानां मालाकारिणीवदनानां (क्ष)णमुत्सवहेतुः। परिचितं परिचयो मुखैरवलोकनं यस्याः। पुष्पाणि[२] लुनातीति। कर्मण्यण् [अष्टाध्यायी]। नदादित्वादिति[३]। तासां मुखानि। किंभूताम्। गण्डयोः स्वेदस्यापनयनेन प्रोञ्छनेन या रुक्पीडा तया क्लान्तानि ग्लानिं गतानि कर्णानामुत्पलानि येषाम्। कुत इत्यत आह। छायादाना(त्त)व प्रतिविम्बेनाच्छादनात्। क्षणपरिचित इत्यत्र (अ)नुबन्धमतीत्यादिना वर्तमाने क्तः। कर्त्तरि षष्ठी। क्लान्तकर्णेत्यनेन रतिविमतिसमानावस्था विच्छित्ति{:} ध्व(नि)ता। यदु(क्तम्)-

"आक्षेपात् स्तोकलक्ष्योऽपि विलासो[४] मण्डनस्रजाम्।
सूचयन्ती रतिश्रान्तिं विच्छित्तिः कामिनां मता।।"

इति। एतदवस्थानां मुखानां छायादानोपकार उचित एव। यदुक्तम् - "अस्यास्तैस्तैर्मूहु{रु}[५]पायैर्हरेत्स्वे(द)कणान् प्रिय" इति।।२८।।

२९. **वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्याः।

---

1. **A** क्रीडाभावनानां
   B क्रीभावनानां
2. **B** पुष्पाण्यपि
3. **A** नदादित्वादी
4. **A, B** विन्यासो
5. **A, B** अस्यास्तैस्तैर्मूहू

विद्युद्दामस्फुरणचकितैस्तत्र पौ{रा}ङ्गनानां[१] लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।२९।।

वक्रेति। यद्यपि उत्तरा)शां *B16a*उत्तरां दिशं प्रस्थितस्य। भवतस्तव पन्था मार्गो वक्रो भवतीति[२] तथाप्युज्जयिन्याः नगर्याः {सु}[३]धालिप्तधनिनिवास एव उत्सङ्गः। क्रोडदेशः। तत्र (प्र)णये प्रीतौ विमुखोऽप्रवर्त्तिको मा भूर्न (भ)विष्य{सि}[४]। (मे)घ{:} प{यः}[५] (सौ)धस्योत्स(ङ्ग) इ(ति)। स(म्य)क् (ना)यकगुणविशेषामोदी सु{रता}[६] भावेङ्गितदर्शनानुभवमाह। विद्युत इति। तत्र नगर्यां पौराङ्गनानां नागरीणां (लो)चनैर्यदि त्वं न रमसे (न) क्रीडसि तदा व(ञ्चि)तोऽसि। संसार(सु)खैरित्यर्थात्। किंभूतैः। विद्युतो दाम(मा)लास्तस्याः (स्फु)रणं प्रकाश इव। चकितानि कु(टिला)नि। लोलः। तैः। अत ए(व) लोलश्चञ्चलोऽपाङ्गो नेत्रान्तो येषां ईदृशैरित्युक्तम्। प्रणयः (प्री)तिविश्र{म्भः}[७]।।२९।।

३०. वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरं सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।।३०।।

*A9b*वीचिक्षोभेति। भो पयोद ! मेघ ! निर्विन्ध्यानामनद्याः रसाभ्यन्तरे सन्निपत्य पथि वर्त्मनि भविष्यतीत्यर्थः। एतेन वाक्येन यथार्थनिर्विन्ध्यां गच्छतीत्यर्थः। रसशब्दोऽनुरागार्थः। तथा च कोषे। "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" [अमरः]। इति। किंभूतायाः वीच्यास्तरङ्गस्य क्षोभेणान्योऽन्यघटनया स्त*B16b*निता शब्दायमाना विहङ्गानां पक्षि{णां}[८] पंक्तिः श्रेणिरेव काञ्चनगुणो मेखला यस्याः सा तथा। पुनः किंभूतायाः। स्खलितेन सुभगं सुन्दरं यथा स्यात्तथा संसर्प(न्त्या): सन् गच्छन्त्याः।

---

1. **A, B** पौरङ्गनानां
2. **B** भवति
3. **A, B** सौधा
4. **A, B** विष्यति
5. **A, B** पयो
6. **A, B** न्दरि
7. **A B** म्भो
8. **A B** नां

पुन: किंभूताया: । दर्शित आवर्त्त[१] एव नाभिर्यस्या: । सा तथा । ननु तस्या: प्रणयमन्तरेण कथं रसाभ्यन्तरं प्रविशामीत्याह । स्त्रीणामिति । हि यस्मात् प्रियेष्वनुरञ्जत् स्वजनेषु स्त्रीणां मानिनीमाद्यं प्रणयिवचनं प्रीतिवचनं विभ्रम: शृङ्गारचे(ष्टा विशे)[२]षो द्रव्य एव । विभ्रमो यथा -

"रा(गो)द्रेककृताकारो रूपयौवनसम्पदा । अनवस्थितचेष्टत्वं विभ्रम: परिकीर्त्तित" । इति ।।३०।।

३१. **वेणीभूतप्रतनुसलि{लां}[३] तामतीतस्य सिन्धु:**
पाण्डुच्छा{या}[४] तटरुहतरु-भ्रंशिभि: शीर्णपर्णै: ।
सौभाग्यं ते सुभग ! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्य: ।।३१ ।।

वेणीति । हे सुभगसुन्दर ! तां निर्विन्ध्यां अतीतस्यातिक्रान्तस्य[५] तव सौभाग्यं प्रियत्वं विरहस्यावस्थया एकवेण्या व्यवस्थया व्यञ्जयन्ती । प्रकाशयन्ती । सिन्धुर्नाम नदी येन विधिना रसपुष्टिप्रकारेण कार्श्यं कृशत्वं त्यजति । स विधिस्त्वयैव उपपाद्य: । संपादनीय: । किंभूताम् । वेणीभूतं केशविन्यासवन्तं वर्त्तुलीभूतमत एव प्रकृष्टमल्पं सलिलं यस्या: सा तथा । किंभूताया: । पाण्डु(च्छाया)दिकै: शीर्णप(र्णै): प*B17a*क्वै: पत्रै: । किंभूतै: । तटे (रु)हन्तीति तटरुहा वृक्षास्तेभ्यो वृक्षेभ्यो भ्रंशितुं शीलं येषां पर्णानां तानि तटरुहभ्रंशितैरित्यर्थ: । सुभगो यथा -

"सपत्नीनखदन्तादिचिह्नं यत्र न दृश्यते ।
वि{स्मा}[६]र्यमाणमा{नेर्ष्य:}[७] सुभ{ग: सो}[८] ऽभिधीयते" ।।३१ ।।

३२. **प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्**
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।

1. **A** आवर्त्तन
2. **A B** निर्वि
3. **A B** सलिला
4. **A B** पाण्डुच्छायो
5. **B** अतितस्य क्रान्तस्य
6. **A, B** स्म
7. **A, B** तष्टि:
8. **A, B** गो

स्वल्पीभूते सुचरितफले स्वर्गिणां गाङ्गतानां
शेषैः पुणैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्।।३२।।

*A10a*ननूज्जयिन्याः सौधोत्सङ्गप्रणयविमुखो च (मा) भूरित्युक्तम्। तत्रैकस्मिन् देशे उज्जयिनी वर्त्तते। प्राप्येति। भो जलद ! भो मेघ ! अवन्तीनामानं देशं प्राप्य। पूर्वोद्दिष्टाम्। पूर्वकथितामुज्जयिनीं नाम नगरीमनुस{र}[1]। अनुगच्छ। किंभूताम्। उदयनस्य वत्सराजस्य कथाकोविदाः पण्डिताः ग्रामस्य वृद्धा यस्याः सा तथा। पुनः किंभूताम्। श्रिया सम्पत्त्या विशालां महतीम्। सर्वसमृद्धियुक्ताम्। पुनः किंभूताम्। विशालां विस्तीर्णाम्। उपमानमाह। स्वल्पीति। दिवः स्वर्गस्य कान्तिमत्शोभायुक्तम्। अत एव एकमुत्कृष्टं खण्डमिव। किंभूतम्। शेषैः पुणैः हृतम्। केषां स्वर्गिणां स्वर्गवासिणाम्। देवानाम्। किंभूतानाम्। गां पृथ्वीं ग(ता)नाम्। कस्मिन् सति। सुकृतस्य सुचरितस्य फलेऽल्पीभूतेऽ*B17b*वस्थि{ते}[2] शेषे सति। पुण्यपरिपाके सतीत्यर्थः। एतेन[3] स्वर्गसुखशेषोपभोगार्थं खण्डमेकं हृतमेवेत्यर्थः। देशे च कोऽयमवन्तिकशब्दः। स्त्रीलिङ्गस्य लोकाश्रयत्वात्। स्त्रीप्रत्ययान्तादिनिर्दिष्टम्। एतेनावन्तीदेशे उज्जयिनी पुरीति क्वचित् प्रत्ययमन्तरेण संदृश्यते। यथा रघुकाव्ये "अवन्तीनाथोऽयमुदग्रवाहुरिति।" तत्रापि टीकायामुक्तम्। "अवन्ती(दे)शो[4] यस्मिन् उज्जयिनी पुरी"ति।।३२।।

३३. **दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां**
प्रत्युषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।।३३।।

दीर्घीति। (य)त्रोज्जयिन्यां प्रत्युषेषु प्रभातेषु शिप्रा नाम नदी तस्या वातः। स्त्रीणां सुरतग्लानिं रतावसाने क्लमम्। विरागादुत्थानताम्। हरति। अपनयति। तां पुरीमनुसरेति सम्बन्धः। किं कुर्वन्। सारसानां कलहंसानां कूजितमव्यक्तशब्दं दीर्घीकुर्वन्। विस्तारयन्। किंभूतम्। पटुना कर्मकोविदेन मदेन हर्षातिशयेन कलमव्यक्तमधुरम्। किंभूतस्य। स्फुटितस्य कमलस्य विकसितस्य पद्मस्यामोदेन सुगन्धेन सह मैत्रीसम्पर्कस्तया कषायः सुगन्धः। तथा च। "निर्यासे च कषायश्च सुरभौ लोहितेऽपि चे"ति [विश्वः]।

1. **A, B** नगरमनुसरेः
2. **A, B** त
3. **B** अत एव
4. **A, B** अवन्तिशो

पुन: किंभूत:। अङ्गानुकूल:। नोद्वेगजनक:। क इव। प्रियतम (इ)व। किं*B18a*भूत:। प्रार्थनायां ममाधमाधरयोर्जलदानादिसुरतया याच्यतया[1] चाटुकार:। प्रियवाचि। प्रिय(त)मा हंसादिवत्कूजति। यदुक्तम्-

"पिकहारित(दा)त्यू{ह}[2]शुकपारा(व)तालीनाम्।

हंसला(विक)यो: (सा)यं (रु)तं (सी)त्कृतस(म्मित)मिति।।"

प्रियतमपक्षे *A10b*स्फुटिता प्रकटीभूता कमला ल(क्ष्मी:) सम्पत्ति: शोभा यस्य ईदृश: समृद्धिवान्। सुन्दरश्च। चन्दनामोदेन रम्य शोभनश्च। यदुक्तम् –

"मुहुर्मुहुर्गन्धविलेपनं शुभम्। पुन: पुन: पूपनिषेवणं परमि"ति।।३३।।

३४. **हारांस्तारांस्तरलगुटिकान् कोटिश: शङ्खशुक्ती:**
शष्पश्यामान्मरकत-मणीनुन्मयूखप्ररोहान्।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां समूहान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषान्।।३४।।

३५. **जालोद्गीर्णैरुपचितवपु: केशसंस्कारधूपै-**
र्बन्धुप्रीत्या[3] भवनशिखिभिर्दत्तनृत्योपहार:।
हर्म्येष्वस्या: कुसुमसुरभिष्वध्वखिन्नान्तरात्मा
मुक्त्वा खेदं ललितवनितापादरागाङ्कितेषु।।३५।।

जालोद्गीर्णैरिति। हे सखे ! हे मेघ ! अध्वनि खिन्न उत्तराशां[4] वाह्याभ्यन्तरशरीरमस्य उज्जयिन्या हर्म्येषु धवलगृहेषु खेदमध्वश्र(मं) त्यक्त्वा च(ण्डे)श्वरस्य धामगृहं याया इति वक्षमाणेन सम्बन्ध:। तथा च "धाम देहे गृहे रश्मावि"ति [मेदिनि]। किंभूतेषु। ललितानां विलासिनीनां पादयो: रागेणालक्तकादिना अङ्कितेषु। क्वचिच्चिह्नेषु। किंभूत:। जालेभ्य: गवाक्षरन्ध्रेभ्य: (उ)द्गीर्णै: सह निर्गतै: केशानां संस्काराय धूपैरुपचितं वपु: यस्य। पुन: किंभूत:। बन्धो: सुहृद्भिर्या प्रीतिस्तया भवनस्य क्रीडागृहस्य शिखिभिर्मयूरै: दिङ्नृत्यमेवोपहारो यस्मै *B18b*स तथोक्त:। धूपैरिति। नानाद्रव्यसंयोगाद्धूपैरिति बहुवचनम्। यदुक्तम् –

---

1. **B** omits this line ममाधमाधरेणयोर्जलदानादिसुरतया याच्यतया
2. **A, B** ह:
3. **A** स्यादर्वकेशसंस्कारधूपैर्बन्धुप्रीत्या
4. **A, B** खिन्नोऽत्तरासां

"चन्दनागुरुकाश्मीरप्रसूति{र्व}[१]नवारणे:। दारुकुसुमधूपैस्तैर्धूपश्चिन्तामणि: स्मृत:।।''

इति। अनेन धूपयिताङ्गं केशं वस्त्रं विधानत:। प्रोल्लसत्सुन्दरामोदो हरेत्कस्य न मानसम्। नृत्योपहारेण गीतादिश्रवणं व्यज्यते। यदुक्तम् -

"तत: समारूह्य च हर्म्यपृष्ठकम्। निषेवणीया: किल चन्द्ररश्मय:।।
तद्वेणुषु वीणाध्वनितालसम्भूतम्। गीतं समन्तादनुरागदीपनमिति।।''

लालित्ययोगाल्ललिता। यदुक्तम् -

"हस्तपाद(यो)र्विन्यासभ्रूनेत्रौष्ठप्रयोजनम्।
सुकुमारविधा(ने)न ललितं तत् प्रकीर्त्तितमिति।।"

वनितानां विपरीतादिरतिसूचकस्य सौधतलपादरागविशेषणस्य दर्शनादपि सुरतग्लानिहानि:। यदुक्तम् –

"आसन् विलासान् नरस्य भूतलो(प)विष्टपादस्य[२] पदोपरिस्थि{ता}[३]।
आलिङ्गिताकुञ्चितभूतलाङ्घ्रिका धृतासना सौधमहीतले क्रम"। इति।।३५।।

३६. **भर्त्तु: कण्ठच्छविरिति गणै: सादरं वीक्ष्यमाण:**
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भि:।।३६।।

*A11a*भर्त्तुरिति। हे (मे)घ ! त्रिभूव(नस्य) स्वर्गादे: गुरो: (पूज्य)तमस्य चण्डेश्वरस्य महा(का)लनाम्न: शिवस्य धाम स्थानं याया:। गमिष्यसि। किंभू*B19a*त:। गणैर्नन्दिप्रभृतिभि: सादरं सगौरवं यथा स्यात्तथा वीक्षमाण:। कुत इत्याह। भर्त्तुरीश्वरस्य कण्ठछविरिव छ(वि)र्य(स्य) ईश्वरोऽयं मत्वा। (किं)भूतम्। पु(ण्यं) पवित्रम्। पुन: किंभूतम्। गन्ध(व)त्या नद्या: मरुद्भिर्वा(तै)र्धूतम्। कम्पि(त)मुपपन्नं यस्य। किं(भू)तस्य। कुवलयस्य नीलोत्पलस्य रजसां परागाणां गन्धो विद्यते येषु[४]तै:। चण्डेश्वरस्य नीलोत्पलप्रियत्वात्। तदधिष्ठानवशा{द}[५]नेन वातोऽपि नीलोत्पलरजो गन्धो वहतीति तात्पर्यम्। पुन: किभूतै:। तोयक्रीडा नाम निरतानां अनवरतप्रवृत्तानां युवतीनां स्नानेन स्नानीय(द्र)व्येण तिक्तै: सुगन्धै:। "स्नानीये चाभिषेके च स्नानं तु परिकी(र्त्ति)तमि"ति।।३६।।

1. **A, B** व
2. **A** विष्टस्य
3. **A, B** तं
4. **B** यस्य
5. **A, B** omit द

३७. **अप्यन्यस्मिन् जलधर ! महाकालमासाद्य काले**
स्थातव्यं ते नयनविषयं यावदत्येति भानुः।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्।।३७।।

अपीति। हे जलधर! मत्कार्यगमनकालादन्यस्मिन्नपि काले कामचरितत्वाद्यदा यदा यास्यसि तदा तदा महाकालमासाद्य यावत् भा{नुः}[1] नयनविषय(म)त्येति। अस्तसमयं प्रयाति। सूर्योदयपर्यन्तमिति वा ते त्वया स्थातव्यम्। सेवाया अवस्थानस्य फलमाह। कुर्वन्निति। शूलिनो महाकालस्य श्लाघनीयां प्रशंसाम्। संन्ध्यायां बलौ पूजायां *B19b* पटहतां मर्दलत्वं कुर्वन् सम्पादयन्। आमन्द्राणां गम्भीराणां गर्जितानामविकलं फलं लप्स्यसे। प्राप्स्यसि। त्वं तावदत्रापि गर्जसि। तत्र गर्जनेन महाकालस्य पूजामर्द्दलेच्छोपहारश्चेत्स्यात्तदा किमिति न स्थातव्यम्। एतेन चण्डेश्वरस्तव गर्जितेन प्रीत{स}सन् वरं दास्यतीत्यर्थः। यद्यपि करिष्यन्निति प्राप्नोति तथापि कुर्वन्निति। वर्तमाने शतृ।।३७।।

३८. **पादन्यासक्वणितरसनास्तत्र लीलावधूतै**
रत्नच्छायाखचितबलिभिश्चामरैः क्लान्तहस्ताः।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दु-
नामोक्ष्यन्ति त्वयि मधुकरश्रेणीदीर्घान्कटाक्षान्।।३८।।

*A11b*पादेति। भो मेघ! तत्र महाकालनिकेतने। वेश्यास्त्वयि त्वद्विषये कटाक्षानामोक्षन्ति। हर्षातिशयात्। कटाक्षेण समन्ताद्रक्षन्तीत्यर्थः। किंभूतान्। मधुकराणां भ्रमराणां श्रेणीः पंक्तिरिव दीर्घाय। किं कृत्वा। त्वत्तस्त्वत्सकाशाद् वर्षस्य वर्षणस्याग्रबिन्दुन् प्राप्य। श्रेष्ठबिन्दुन् प्राप्य। किंभूतान्। नखानां पदस्य क्षेत्रस्थानस्य सुखान् सुखकरान्। किंभूताः। देवप्रदक्षिणकारणार्थं पादयो न्यासेन विक्षेपेन क्वणिता मेखला रसना यासां तास्तथा। पुनः किंभूताः। चामरैर्बालव्यजनैः कृत्वा क्लान्ता आयासं प्राप्ता हस्ता यासां तास्तथा। सुकुमारत्वात्। किंभूतैः। लीलया इच्छाव{शे}[2]नावधूतैः कम्पितैः। पुनः किभूतैः। रत्नानां वेश्या प*B20a*रिहितवलयादिखचितानां चामरै(:) रोपितानां वा छायया प्रभया खचिता वलयश्चामरदण्डो येषां तैः। तथा च। बलिश्चामरदण्डो स्याद्वलिः

---

1. **A, B** भानुनि
2. **A, B** से

पूजोपहारयोः। कटाक्ष इति।[१] तारविक्षेपः कटाक्ष इत्यभिधीयते। नृत्यपक्षे (पा)दन्यासो यथा "नृत्येषु चरण(न्या)सः पादन्यास" इतीष्यते [हारावली] ।।३८।।

३९. पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या।।३९।।

पश्चादुच्चैरिति। हे जलधर! पशुपतेरीश्वरस्य। नृत्यारम्भे नृत्यसमये आर्द्रस्याभिनवस्य। नागाजिनस्य गजचर्मणः[२]। इच्छां स्पृहाम्। पश्चाद्बलिपटहानन्तरम्। त्वं हर। अपनय। {योऽ}[३]प्युपरि आर्द्रकरिचर्मैर्वा[४] गृहीतसमं नृत्यतीत्यागमः। किंभूतः। उच्चैर्महान्तस्तरवो भुजा इव। तेषां वनं समूहमभिलक्षीकृत्य मण्डलेनात्मविम्बेन देहेन छायया वा लीनः लयं गतः। पुनः किंभूतः। सान्ध्यं सन्ध्या{यां} भवम्। तेजो दधानः। धारयन्। तेजः किंभूतम्। प्रतिनवजवापुष्पम्। अभिन{वौ}[५]ड्रकुसुममिव रक्तम्। लोहितम्। किंभूतः सन्। शान्तोद्वेगो दर्शनघृणा ययोरीदृशी। अत एव स्तिमिते स्तब्धीभूते। हर्षा{त्तु}[६] स्निग्धत्वान्नयने यस्मिन् यथा भवति तथा। भवान्याः पार्वत्यार्दृष्टा भक्तिः सेवा यस्य ईदृशः सन्। शान्तो*B20b*द्वेगत्वात् पार्वती तुभ्यं वरं दास्यतीति गजचर्म इच्छा(ह)रणात्। भवानीप्रसादकरणाच्च ईश्वरोऽपि वरं दास्यतीति। लीन इत्यकर्मकात् कर्त्तरि क्तः। गत्यर्थत्वात्कर्त्तरि क्तो वा। अभिलीनो गतिप्रकार एव।।३९।।

४०. गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेदैस्तमोभिः।
सौदामिन्या कनकनिकषच्छायया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः।।४०।।

*A12a*गच्छन्तीनामिति। तत्र उज्जयिन्यां नक्तं रात्रौ योषितामभिसारिकाणां नरपतेः पथि मार्गे सौदामिन्या विद्युता। उर्वीं दर्शय प्रकाशय। किं कुर्वतीनाम्। रमणस्य

---

1. **B** omits अपाङ्गो नेत्रयोः
2. **A** नागाजिनश्चर्मणः
3. **A, B** स्यो
4. **B** चर्मणे वा
5. **A, B** वो
6. **A, B** स्तु

कान्तस्य वसतिं वे(श्म) गच्छन्तीनाम्। किंभूतया। कनकनिकषछायया। सुवर्णस्य पटिकाख्या पाषाणविद्युज्जालया। किंभूते। तमोभिरन्धकारैः रुद्ध आलोको दर्शनं यस्मिन्। किंभूतैः। {सू}[1]च्या भेदैरिति गहनत्वात् भेत्तुं शक्यैः। किं च तोयस्योत्सर्गार्थं यत्स्तनितं गर्जितं तेन मुखरश्च स शब्दो मा भूर्न भविष्यसि। कुत इत्याह। यतस्ताः स्त्रियः विक्लवाः {च}[2]। अभिसारिका यथा –

"रूपयौवनसम्पन्ना कुलभोगधनादिका। वासोऽङ्गरागमलकं चन्दनेन्दूदयादिभिः।

उद्दीप्यमानं पञ्चेषु पञ्चवाणप्रतापिता। याऽभिसारयते कान्तं सा भवेदभिसारिका।।"

[भावप्रकाशनम्-४.१६७]

र(म)णो यथा -

"श्लाघनीयः सखीमध्ये गु*B21a*णैः सौजन्यजन्मभिः।

[भावप्रकाशनम्-५.२३]

श्लाघमानो र(मय)ति रम(णः) सोऽभिधीयते"[3]।।४०।।

४१. **तां कस्यांचिद्भवनवडभौ सुप्तपारावतायां**
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्यु-पेतार्थकृत्याः।।४१।।

तामिति। हे जलद ! दृष्टे सूर्ये उदिते भा{नौ}[4] सति (भ)वान् पुनरप्यध्वनः शेषमवशिष्टं भागं पन्थानं वाहयेत् गमिष्यसि। किं कृत्वा। कस्यांचिद्भवनवड(भौ) तां रात्रिं नीत्वा। भवनस्य वडभिः। गृहस्योपरिभू(भा)गविशेषो वडभिः। न तु सोपानस्य तथा संज्ञा स्यात्। तथा च। माघकाव्ये - "समं वधूभिर्वडभिर्युवानः"। किंभूतायाम्। सुप्तः पारावतो यस्याम्। किंभूतश्चिरविलसनात् बहुस्फुरणात् खिन्नं विद्युदेव कलत्रं भार्या यस्य। काचित् कामिनी चिरभोगात् खि{न्ना}[5] भवति। तथा त्वमसीति। ननु

1. **A, B** शू
2. **A, B** स्मः
3. In भावप्रकाशनम्-५.२३, the first line is identical with the definition of नन्दन but the second line is different as श्लाघयन्नन्दयति यः प्रियां नन्दन ईरितः।
4. **A, B** भानो
5. **A, B** न्नं

स्थानस्य रमणीयत्वाच्चिरकालं न तिष्ठामीत्याह। मन्येति। खलु यस्मात् सुहृदां मित्राणामभ्युपेतं स्वीकृतमर्थस्य कृत्यं करणं यैः। ईदृ(शो) साधवो न मन्दायन्ते न श्लथा भवन्ति। अतो यास्यसीत्यर्थः। सुप्तेत्यादिनाऽप्रमादकामिजनोचितसुरतो निवासस्थानं व्यज्यते। यदुक्तम् -

"विशुद्धभावोचितचित्रभावितं सुरङ्गसिन्दूरविराजकुट्टिमम्।
प्रहृष्टपारावतसारिकाशुकं विनिर्मये वासगृहं मनोरमम्।।"

व[१]हेः स्वा*B21b*र्थ {इः}[२]। कारितान्तो वा।।४१।।

४२. **तस्मिन्काले नयनसलिलं योषितां खण्डितानां**
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।
प्रालेयास्रं कमलवदनात्सो(ऽ)पि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः।।४२।।

*A12b*तस्मिन् कालेति। हे जलद ! तस्मिन् काले प्रभातसमये योषितां स्त्रीणां नयनयोः सलिलमश्रु। प्रणयिभिः प्रियतमैः। नलिनप्रकारेण शान्तिं नेयं नेतव्यम्। किंभूतानाम्। खण्डितानां वञ्चितानामतो भानोः सूर्यस्य वर्त्म मार्गमाशु वेगेन त्यजसि। न(नु) प्रणयिभिः खण्डितानामभिलषितुं[३] कर्तुं भानोर्वर्त्म कथं मया त्यक्तव्यमित्याह। नलिन्याः पद्मसंहतेः। कमलमेव वदनं मुखम्। तस्मात्प्रालेयं हिमं तदेवाशयमस्रम् अश्रु हर्तुं प्रभातेऽपनेतुं प्रत्यावृत्तः आगतः। स भानुरपि त्वयि। करो रश्मिः। स एव करो हस्त{स्त}स्य[४] रोधके सति अनल्पा बहुतराऽभ्यसूया कोपो यस्य ईदृशः स्यात्। सूर्यस्यापि खण्डिता कमलिनी विद्यते तदभिप्रायेण वदामि खण्डिता यथा -

"निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रण(वि)शेषवि{चित्रि}[५]ताङ्गः।
यस्याः कुतोऽपि गृहमेति पतिः प्रभाते सा खण्डिता निगदिता (क)विभिः पुराणैः।।"

इति। कररुधीति क्विबन्तः।।४२।।

---

1. **A** worm-eaten
 B वा
2. **A** worm-eaten
 B इन
3. **A** worm-eaten
 B खण्डितामभिलषितुं
4. **A, B** हस्तस्य
5. **A, B** रचि

४३. **गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने**
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरो-द्वर्त्तनप्रेक्षितानि।।४३।।

गम्भी(रे)ति ! गम्भीरा नाम्न्याः सरितो नद्याः पय*B22a*सि जले ते तव छायात्मापि प्रतिविम्बशरीर(म)पि प्रवेशं लप्स्यते। प्राप्स्यसि। किंभूतः छायात्मा। प्रकृतिसुभगः स्व(भा)वर(मणी)यः। किंभू(ते)। प्रसन्ने निर्मले। कस्मिन् चेतसीव। यथा काचित् कामी कामान्तरेण कान्तायाश्चेतसि प्रवेशं लभते। तद्वत्। तस्मादेकं ततः कारणात्। अस्याः सरितश्चटुलानां चञ्चलानां शफरीणां प्रौष्ठमत्स्यानां उद्वर्त्तनानि परावृत्तय एव (प्रेक्षि)तान्यभिलाषाऽभिव्यक्तये कटाक्षदर्शनानि मोघीकर्त्तुं निष्फली{कर्त्तुं}[१] धैर्यात् धैर्यमाश्रित्य नार्हसि। उचितो न भवसि। किंभूतानि। कुमुदवि{श}[२]दानि। निर्मलानि। "प्रौष्ठी तु शफरीद्वयोः।" [अमरः] ।।४३।।

४४. **तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं**
हृत्वा नीलं सलिलवसनं मुक्तरोधो नितम्बम्।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादः पुलिनजघनां को विहातुं समर्थः।।४४।।

*A13a*त{स्या इ}ति[३]। भो मेघ ! ते तव प्रस्थानं कथमपि कृच्छ्रेण भावि भविष्यति। किंभूतस्य। लम्बमानस्य। पयःपानेन गुरुत्वाङ्गमनेन अधो नमतः। किं कृत्वा। तस्याः (ग)म्भीरायाः सलिलमेव वसनं वस्त्रं हृत्वा। किंभूतम्। प्राप्ता वानीरशाखा येन तम्। पुनः किंभूतम्। नीलं नीलवर्णं वेतसपत्रस्य नीलत्वात्। तथा करेण किंचिद्धृतमिव वेतसशाखायाः करतुल्यत्वात्। पुनः किंभूतम्। मु{क्तः}[४]। त्य{क्तः}[५] रोधः[६] स्त्रीत्वमेवनित{म्बः}[७] येन *B22b* तं तथा। अत एव सखेति सम्बोधने। कामु(को)ऽपि कामिन्या वस्त्रमपहरति।

---

1. **A, B** कृत
2. **A, B** ष
3. **A, B** स्य इ
4. **A, B** क्तम्
5. **A, B** त्यक्तम्
6. **A** रोधे
7. **A, B** म्बं

सा च लज्जिता सति करेण ईषद् रुणद्धि[१]। ततो वस्त्रं नीलं च त्यजति। ततो नितम्बमालम्बते। आश्रयति। अतिकृच्छ्रहेतुमाह। कान्तेति। ज्ञातो विदित आस्वादः कामरसो येन। ईदृशः को जनः विपुलमिव वृहत्त्वाज्जघनं यस्याः। ईदृशीमतिप्रौढां कामिनीं विहातुं त्यक्तुं कोऽपि समर्थो भवति। न कोऽपीत्यर्थः। पुलिनजघनामिति पाठान्तरं तदप्ययुक्तम्। पुलिनं सैकतं तदेव जघनं यस्याः सा तथा। "कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिष्वि"त्यमरः।।४४।।

४५. **त्वन्नि{ष्य}[२]न्दोच्छ्वसितवसुधागन्धसंपर्कपुण्यः**
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम्।।४५।।

त्वन्नि{ष्य}[३]न्देति। हे मेघ ! वायुः पवनः। ते तव पार्श्वे नीच्चैरल्पं वास्यति। किंभूतस्य। देवः पूर्वं यस्माादीदृशं गिरिं देवगिरिम्। उपजिगमिषोर्गन्तुमिच्छोः। किंभूतः। तव नि{ष्य}[४]न्देन जललवेन उच्छ्वसिताया उत्सुकाया वसुधाया (ग)न्धे च सहा(यः स)म्पर्कः मे(ल)नं तेन पुण्यः शोभनः। पुनः किंभूतः। अत एव शीतः शीत(लः)। पुनः किंभूतः[५]। काननस्य वनस्य उ(दुम्ब)राणां फलानां परिणमयिता पाचयिता। वर्षाशीतवातेन स्वभावात्। पुनः किंभू*B23a*तः। स्रोत(सः) करस्य रन्ध्रे विवरे। ध्वनितेन सुभगं म(नो)हरं यथा स्यात्तथा दन्तिभिर्गजैः पीयमानः। शोभनेऽपि च (पु)ण्यं स्यादिति। (स्रो)तः करोऽपि करिण इति।।४५।।

४६. **तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा**
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः।।४६।।

*A13b*तत्रेति। हे मेघ ! यत्र देव(गि)रौ (हरि)णवस(ति)रावासो यस्य तमवश्यं दृश्यम्। स्कन्दं कार्त्तिकेयम्। पुष्पा(णा)मासारैरनवच्छिन्नपातैः कृत्वा भवान् स्नपयितुं कारयितुं पुष्पमेघीकृतात्मा सन्। पुष्पाणां मेघः कृत आत्मा येन स तथा।

---

1. **A** ऋणद्धिः
2. **A** स्य
3. **A, B** स्य
4. **A, B** स्य
5. **B** omits किंभूतः

पुष्पजलादिकृतदेह:। कामरूपत्वात्। संभृतै:। व्योम्न: आकाशस्य गङ्गाया जलेन आर्द्रैस्तिमितै:। कुत इत्याह। रक्षेति। हि यस्मान्नवं शशिनं विभर्त्तीति क्विप्। तेन चन्द्रशेखरेण वासवीनामिन्द्रसम्बन्धिनां चमूनां सेनानां रक्षाहेतो:। अतिक्रान्ता(दि)त्यो येन (तं) सूर्यादपि[1] तेजसा[2] तीव्रं स्कन्दरूपम्। तेज: हुतवहमुखे वह्निमुखे सम्भृतं क्षिप्तम्। पुष्पै: पूर्णो मेघ: कृत: आत्मा येन इति च्वि:। स्नपयतु इति ग्लास्नावनुव{माञ्चे}[3] ति ह्रस्व:।।४६।।

४७. **ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी**
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।
धौतापाङ्गं हरशशिरुचा प्याययेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथा:।।४७।।

ज्योतिर्लेखेति। हे मेघ ! तं मयू*B23b*रम्[4] आप्याययेः। संतर्प(यि)ष्यसि। पश्चादाप्यायनानन्तरं गर्जितैर्नर्त्तयेथा: नर्त्तयिष्यसि। किंभूतै:। अद्रेर्देवगिरे: पर्वतस्य[5] ग्रहणेन सम्पर्केण गुरुभिरर्थात् प्रतिध्वनिना चारुभि:। किंभूतम्। हरस्य ईश्वरस्य। शशिनश्चन्द्रस्तस्य। चारुणा कान्त्या धौतं निर्मलीकृतं अपाङ्गनेत्रान्तम्। तमिति। यस्य मयुरस्य। बर्हं {पि}[6]च्छम् । भवानी गौरी। पुत्रस्य कार्त्तिकेयस्य वाहनमिति। प्रेम्णा स्नेहेन। हेतुना। कर्णे करोति कर्णे धारयति[7]। तमाप्याययेः[8]रिति सम्बन्ध:। किंभूतम्। ज्योतिषो दीप्ते लेखा वलयमिव तदाकारत्वात्। पुन: किंभूतम्। गलितं स्वयमेव पतितम्। किंभूते। कुवलयस्य नीलोत्पलस्य दलं पर्णं तत् प्राप्नोतीति क्विप्। यस्मिन् कुवलयदलं प्राप्तुं शीलमस्येति। णिजन्तेन वा कर्मधारय:। एतेन भवान्या: कर्णकुवलयदलाङ्कितत्वादना {भरण}[9] माणो न भवति। किंभूता। दृक् सुगन्धि कोमलम्। सुन्दरमपि कुवलयदलं हित्वा पुत्रप्रेम्णा (ब)र्हधार{णं}[10] *B24a* करोतीति व्यज्यते।।४७।।

---

1. **B** omits सूर्यादपि
2. **B** तेजसादपि
3. **A, B** मश्चे
4. **B** The second one handwriting is repeated from this word.
5. **B** omits पर्वतस्य
6. **A, B** पु
7. **B** कर्णयति
8. **B** तमाप्यायये
9. **A, B** रभ
10. **B** reads as णे

४८. आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभया-द्वीणिभिर्दत्तमार्ग:।
व्यालम्बेथा: सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्।।४८।।

*A14a*आराध्येति। हे मे(घ) ! एनं शरवणभवं जातं देवं कार्त्तिकेयं पुष्पस्नानेनाराध्य त्वं व्यालम्बेथा:। विलम्बं करिष्यसि। किंभूत:। उल्लंघितोऽतिक्रमगत:। अध्वा मार्गो येन स तथा। सिद्धानां देवयोनिविशेषाणां द्वन्द्वैर्युग्मैर्जलानां कणेभ्यो[1] भयाद्दत्त: त्यक्त: मार्गो यस्य स तथा। किंभूतै:। वीणिभिर्वीणायुक्तै:। किं कारयिष्यन्। रन्तिदेवस्य कीर्त्तिं मानयिष्यन्। किंभूताम्। स्रोतसो नद्या: स्वरूपेण भूविक्षितौ। परि(ण)तां प्रवृत्ताम्। पुन: किंभूताम्। सुरभे: गोमातुस्तनयानां वत्सानामालम्भजाम् (आलम्भा)न्मरणाज्जातां धारां प्रवाहेन निष्पन्नाम्। एतेन रन्तिदेवस्य कीर्त्तिं चर्म{ण्व}[2]तीनदीं पूजयिष्यन् व्यालम्बेथा:। अत्र[3] किल रन्तिदेवस्य यज्ञे क*B24b*पिलगवीनामालम्भनाद्वा रक्तप्रवाहेण ऋषिप्रणीतचर्म{ण्व}[4]ती नदी सम्पन्नेति पौराणिकी कथा। शरवणमिति। {प्रनिरन्त:शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि}[5] [अष्टाध्यायी ८.४.५] इत्यनेन[6] णत्वं वनस्येत्यनुवर्त्तते।।४८।।

४९. त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्या: सिन्धो: पृथुमपि तनुं दूरभावात्प्रवाहम्।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टि-
रेकं मुक्तागुणमिव भुव: स्थूलमध्येन्द्र-नीलम्।।४९।।

त्वय्येति। हे मेघ ! त्वयि जलमादातुमवनते सति नूनमेवं मन्ये। तस्या: सिन्धोश्चर्म{ण्व}[7]तीनद्या: पृथुप्रवाहं महान्तमपि गगने गतिर्येषां ते विद्याधरादय: दृष्टिराव(र्ज्य) अधो नमयित्वाद्दूरभावाद्दूरत्वाद्धेतो: तनुमल्पं प्रेक्षिष्यन्ते। किंभूते। शार्ङ्गिणो

1. **B** करणेभ्यो
2. **A, B** न्व
3. **B** The first one handwriting is resumed from this word.
4. **A, B** न्व
5. **A, B** शरेषु प्लक्षाम्रार्काश्वत्थिखदिरपीयूषाप्रतिनिरन्तरेभ्य
6. **A, B** इति
7. **A, B** न्व

वासुदेवस्य वर्णस्य प्रभा(या:) चौरे सव(र्णे) कृष्णवर्णे। उपमानमाह। एकमिति। एकं श्रेष्ठं भुव: पृथिव्या: मुक्तागुणमिव। मुक्तारसमिव। किंभूतम्। स्थूलो महान् नायकाख्य: मध्येन्द्रनीलमणिर्यस्य तम्। अद्भूतोपमेयम्। यदुक्तम् -

"यदि किंचिद्भवे(त्प)द्मं सु(भ्रु) विभ्रान्तलोचनम्।

तत्ते तदा श्रियं धत्तामित्य-सावद्भूतोपमेति।।"

यदि त्वं नमसि तदा प्रवाहो मुक्तागुण इव द्रष्टव्य:। त्वं तु तस्य नायकाख्य इन्द्रनीलमणिरिव।।४९।।

५०. **तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां**
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मविम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम्।।५०।।

A14b (ता)मुत्तीर्येति। हे मेघ ! तां*B25a*चर्म{ण्व}[1] तिभि:[2] समुत्ती(र्य) अतिक्रम्य (ब्रज) गच्छ। किं कुर्वन्। (आ)त्मनो विम्बं दश(पु)रस्य नगरस्य वधूनां स्त्रीणां नेत्रै: कौतूहलानां कौतुकवतां नेत्राणां पात्रीकुर्वन् योग्यत्वमु(त्पा)दय(न्)। किंभूतानाम्। परि{चि}त:[3] स्वभ्यस्त: भ्रूलतानां विभ्रमो यै:। त्वासन्नत्वात्। पुन: किंभूतानाम्। पक्ष्मणां नेत्रलोम्नां उत्क्षेपादु(प)रिप्रेरणाद्वि(ल)स(न्त)कृष्णसारस्यातिरिक्त-कृष्णश्वेतप्रभा येषाम्। पुन: किंभूतानाम्। अत एव कुन्दक्षेपस्य कुन्दस्तवकस्यानुगानामुपरि अन्वितानां मधुकराणां भ्रमराणां श्रियं शोभां मुष्णन्तीति क्विप्।।५०।।

५१. **ब्रह्मावर्त्तं जनपदमधश्छायया गाहमान:**
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथा:।
राजन्यानां {शि}[4]तशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यषिञ्चन्मुखानि।।५१।।

ब्रह्मावर्त्तरिति। हे मेघ ! तत्कौरवं क्षेत्रं कुरुक्षेत्र(नाम)पुरं (स्थानं) भजेथा:।

---

1. **A, B** न्व
2. **A, B** तीं
3. **A, B** परित:
4. **A** सि

सेविष्यसे। किंभूतानाम्। क्षत्राणां प्रधनस्य संग्रामस्य पिशुनं सूचकम्। किं कुर्वन्। ब्रह्मावर्त्तं नाम जनपदम्। अधश्छायया गाहमान:। प्रतिविम्बेन स्पृशन्। तदन्तिकमित्याह। राजेति। यत्र कुरुक्षेत्रे गाण्डीवं नाम (ध)नुर्यस्य (सो)ऽर्जुन:। शितैस्तीक्ष्णै: श(रा)णां शतै: कृत्वा राजन्यानां क्षत्रियाणां भीष्मद्रोणप्रभृतीनां सुखान्यभ्यषिञ्चत्। अभिषिक्तवान्। उपमानमाह। धारेति। धारापान्तैरासारवृ*B25b*ष्टिभि: कमलानि पद्मानि त्वमिव।

"सरस्वतीदृषद्वत्योरन्तरम्। तद्देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते।।" [मनुस्मृति:]

"पिशुनौ खलसूचकावि"ति [अमर:]। धन्वेति। बहुव्रीहौ धनुषो धन्वादेश:। "क्षेत्रं दे(हे) कलत्रे (च) केदारे (सि)द्धधामनी"ति [विश्व:]।।५१।।

५२. **हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां**
बन्धुप्रीत्या समरविमुखो लाङ्गली या: सिषेवे।
कृत्वा तासामभिमतमपां सौम्य सारस्वतीना-
मन्त:शुद्धस्त्वमसि भविता वर्णमात्रेण कृष्ण:।।५२।।

*A15a*हित्वेति। हे सौम्य ! हे सुन्दर ! तासां सारस्वतीनां सरस्वती(सम्ब)न्धिनीनामपामभिगमं ग्रहणं कृत्वा त्वमन्त:शुद्ध:। अभ्यन्तरपवित्रो भवितासि। भविष्यसि। किन्तु वर्णमात्रेण कृष्ण:। केवलं वाह्येन कृष्णवर्ण:। भविता भविष्यसि। तासामिति। कासाम्। या: आप:। लाङ्गली वलभद्र: सि(षेवे) सेवित(वा)न्। किं कृत्वा। हालां मदिरां हित्वा। किंभूताम्। अभिनवो रस आस्वादो यस्या:। पुनस्त्यक्त्वा। किंभूताम्। रेवत्या बलभद्रवल्लभाया:। लोचनमेवाङ्कं चिह्नं यस्या:। मधुर: स्वच्छत्वात्। बन्धो: कृष्णस्य प्रीत्या समरविमु(ख:) युद्धपरा(ङ्मु)ख:[1]। त्वमपीति पाठेन केवलं बलभद्र: रेवत्या युक्तम्। कामिनां मधुपानं (कामि)न्या सह युक्तमेव। यदु(क्तम्)-

"मनोरमतमं तद्वत्खाद्यं पानं च सुन्दरम्।
तया सुहृद्भिश्च समं सा*B26a*नु(रा)गं स(मा)चरेदि"ति।।

शोभनोऽपि सौम्य स्यात् (इ)ति। (अ)र्जुनकृतपक्षपातपाण्डवमण्डितपुण्डरिकाक्षेण समं कुरुपति:। (ग)दाविद्या पुरो (वि)ग्रहे भावीति (कृ)त्वा बलदेवो रणादवससारेति पौराणिकी कथा।।५२।।

५३. **तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां**
जह्नो: कन्यां सगरतनय-स्वर्गसोपानपंक्तिम्।

---

1. A पराङ्मुख:

गौरीवक्त्रभ्रूकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणम-करोदिन्दुलग्नोर्मिहस्ता।।५३।।

(तस्मा)द्गच्छे{रि}ति[१]। तस्मात्कुरुक्षेत्रा(द)नुकनखलं देश(म)नुलक्षीकृत्वा जह्नोः कन्यां गङ्गां गच्छेः गमिष्यसि। किंभूताम्। शैलानां[२] पर्वतानां राज्ञो हिमवतः सकाशादवतीर्णाम्। पृथिव्यामाविष्कृताम्। पुनः किंभूताम्। सगरस्य (ई)क्ष्वाकुवंशनृपति-विशेषस्य तनयानां पुत्राणां स्वर्गीयारोहणार्थं सो(पा)नानां पादसंचारयोग्यघटितशिला-विशेषाणां पंक्तिमिव। अनायासे (च) स्वर्गप्रापणात्। सगरमखमहितसुरपतिहृततुरङ्गकृत-सलिलनिधितलगतसगर(सु)तविहसितकुपितकपिलमुनिकोपानलज्वलितसुत(ग)-णसुरन(ग)रगतिहेतुभगीरथकृतप्रसादविधिविनिहितहरिचरणगलिततोयमिति। शिरसि वभार भवानीवल्लभस्ततश्च हिमवति तामधो तत्याज। ततः (सु)रगजकृतविवरं कृ*B26b*त्वा कृतावतारभगीरथपथप्रवृत्या[३] भागीरथी सगरसुता(न्नि)नाय देवलोकमिति पौराणिकी कथा। तस्मात् मानमुपपादयनाह। गौरीति। या गङ्गा शम्भोः केशग्रहणमकरोत्। किं कृत्वा। गौर्याः पार्वत्याः भ्रूकुटीनां रचनां कटाक्षाद्वा कुञ्चितादिरूपां (तैः) विहस्येव। फेनानां शुक्लत्वात्। किंभूताम्। इन्दौ चन्द्रकलायां लग्नोर्मिहस्ता इव यस्य दीर्घाकारत्वात्। ईदृशैर्गङ्गाफेनैः कृत्वा। *A15b* त्वं तावदीश्वरस्यार्धाङ्गं गृहीत्वा गर्वमावहसि। अहं पुनस्तदुपरि उत्तमाङ्गं गृह्णामीत्युत्प्रेक्षा।।५३।।

५४. **तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी**
त्वं चेदच्छस्फटिकवि{श}[४]दं तर्कयेस्तिर्यगम्भः।
संसर्पन्त्या सपदि भवतः श्रोतसि च्छायया सा
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा।।५४।।

तस्याः पातुमिति। हे मेघ ! तस्याः गङ्गायाः (अ)म्भो जलं तीर्यक् व(क्री)भूतः सन्। त्वं चेद्यदि तर्कयेः। समीहेथाः। तदाऽसौ गङ्गा सपदि तत्क्षणात्{स्त्रो}[५]तसि भवतश्छायया कृत्वाऽस्थाने उपगतयमुनायाः सङ्गमेनाभिरामा मनोहरा स्यात्। अयमभिप्रायः। तत्क्षणात् श्रोणी(भूतां) वकानां[६] (शुक्ल)गङ्गा कृष्णय(मु)ना

1. **A, B** तस्माद्गच्छेति
2. **A, B** शैवालानां
3. **B** कृतावतारभागीरथीरथपथप्रवृत्या
4. **A** ष
5. **A, B** श्रो
6. **B** श्रोतसी वकपक्षी

{चै}[१]कत्वमिति। भवतस्तदा द्वयोः सङ्गमेनाभिरामेति। किंभूतायाः। संसर्पन्तः प्रवहन्त्याः। किंभूतम्। अच्छस्फटिकवि{श}[२]दं तद्वत् निर्मलम्। किंभूतः। व्योम्नि आकाशे (पू)र्वार्द्धे*B27a*नाग्रतो भागेन विल(म्बि)तुं शील(मस्ये)ति। (क) इव। (सु)रगज इव। यथा इन्द्रस्य ऐरावतो व्योम्नि पूर्वा(र्द्धे) लम्ब(यि)त्वा तो(यस)तर्कये तथेत्यर्थः। व्योम्नीति। वै(ष)यिकस(प्त)मी।।५४।।

५५. **आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां**
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रां त्रिनयनवृषोत्खातपङ्कोपमेयाम्।।५५।।

आसीनेति। हे मेघ ! तुषा(रैः गौ)रमचलमर्थात् हिमवन्तं पर्वतं प्राप्य। तस्य हिमाद्रेश्च (शृ)ङ्गे निष(ण्णः) विश्रान्तः सन् (शु)भ्रा(मु)ज्ज्वलां शोभां वक्षसि। किंभूतम्। तस्या{:} गङ्गायाः प्र(भवं) प्रथमो(प)लब्धिस्थानम्। पुनः किंभूतम्। मृगाणां नाभेः कस्तुरिकायाः गन्धैः सुगन्धिभूता[३] शिला यस्य तम्। किंभूतानाम्। आसीनानाम्। किंभूतेऽध्वनि मार्गे (उ)त्पन्नस्य श्रमस्य विनयने अपनोदनिमित्तम्। किंभूताम्। त्रिनयनस्य त्रिलोचनस्य वृषेण वृषभेण उत्खातः उत्पाटितः शृङ्गेणोत्तोलितः यः पङ्कस्तेनोपमेयाम्। उपमिताम्। "वृक्षो हि भगवान् धर्म" इति नन्दिकेश्वरपुराणम्। तेनोत्खातोऽपि पङ्कः प्रशंस्य(:)। अतो हिनोपमादोषो नास्ति।।५५।।

५६. **तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा-**
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलास्सम्पदो ह्युत्तमानाम्।।५६।।

A16a (तं चे)ति। हे मेघ ! वायौ सरति वहति[४] सति। दवाग्निर्वनाग्निस्तं हिमालयं चेद् यदि वाधेत पीडयेत तदा *B27b*त्वं वारिणो धाराणामनेकैः सहस्रैरलमित्यर्थम्। एनं दवाग्निं शमयितुमर्हसि। योग्योऽसि। यदा सुखयितुमिति पाठस्तदा

---

1. **A, B** चे
2. **A, B** ष
3. **B** सुरभिताः
4. **B** omits वहति

एनं पर्वतमिति योज्यम्। किंभूत:। सरलद्रूमाणां स्कन्धेषु प्रकाण्डेषु संघट्टनेन च जन्म उत्पत्तिर्यस्य स तथा। पुन: किंभूत:। उल्काभि: ज्वालाभिर्क्षीयितो नाशितश्चमरीणां बालभारो केशकलापो येन स तथा। ननु मया कथं शमयितव्यमित्याह। आपन्नेति। हि यस्मादुत्तमानां त्वद्विधानां सम्पदो विभूतय:। आपन्नानां प्राप्तविपत्तीनामन्त:पीडाया: प्रशमनं फलं प्रयोजनं यासां तास्तथा। शान्तिर्मङ्गलनाशयोरिति। "वने च वनवह्नौ च दवौ दावौ च[1] दृश्यते" [शाश्वत:]। "आर्त्ति: पीडाधनुष्को{ट्योरि}"[2]ति [अमर:] ।।५६।।

५७. **ये त्वामुक्तध्वनिमसहना: स्वाङ्गभङ्गाय तस्मिन्**
दर्पोत्सेकादुपरि शरभा लंघयेयुर्भवन्तम्।
तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्
के वा न स्यु: परिभवपदं निष्फलारम्भयत्ना:।।५७।।

येत्वेति। तस्मिन् हिमाद्रौ स्वस्यात्मन:। अङ्गस्य भङ्गाय शरीरं भङ्क्तुं ये शरभा: पशु(भे)दा:। (दर्प)स्योत्सेकादतिशयादुपरि उर्ध्वं गत्वा त्वां (मान)यिष्यन्ति। तान् तुमुल(वा)हनकरकाणां प्रस्तरा(णां) वृष्टिरेव हास:। शुक्लत्वात् तेनावकीर्णान्[3] (वि)क्षिप्तान् (भ)र्त्सितान् वा *B28a*कुर्वीथा:। करिष्यसि। किंभूता:। मुक्तस्त्व(क्रोध्य) वीर्येन ई(दृश)मलंघ्यं लंघयितुमशक्यं त्वां येऽसहना: रिपु[4]वीर्यमगणयन्त:। ननु यद्यदोषार्थे तेषां परिभवपदं भविष्यति। तदा किमिति हासं करिष्यामी(त्याह)। के वेति। निर्गतं फलं यस्मात्तस्य कार्यस्यारम्भे यत्नो येषां ते (ज)न्तव:। परिभवस्य तिरस्कारस्य पदमास्पदं के वा न स्यु:। अपि तर्हि भवेयुरित्यर्थ:। शरभो नाम मृगविशेष:। अष्टापद: शरभ: स: सिंहघात्युर्ध्वलोचन इति। सिंहघातीत्वेनासहना इत्यु(क्ता)।।५७।।

५८. **तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौले:**
शश्वत्सिद्धैरुपहितबलिं भक्तिनम्र: परीया:।
यस्मिन्दृष्टे करणविगमादूर्ध्वनिहितपापा:
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधाना:।।५८।।

*A16b*तत्र हिमालये। अ(र्धे)न्दुमौले: शङ्करस्य (च)रणयोर्न्यासं चिह्नं भक्त्या

1. **B** दवोदावश्च
2. **A, B** टावि।
3. **B** तीर्णन्
4. **A, B** पुर

नम्रः सन् परि सर्वतो भावेन परियाः[1] प्रदक्षिणयिष्यसि। किंभूतम्। (दृ)षदि पाषाणे व्यक्तं स्फुटम्। पुनः किंभूतम्। सिद्धैर्विद्याधरादिभिः[2] शश्वत्पुनः पुनरूपहितः बलिः पूजा यस्य। परिपूर्वादिशो रूपम्। यस्मिन् चरणन्यासे दृष्टे सति। श्रद्दधानाः श्रद्धावन्तो लोकाः। करणस्य विगमात्। (त्या)गात्। स्थि(रा)णां शिवस्य गणानां नन्द्यादी*B28b*नां पदप्राप्तये संक(ल्पन्ते)। समर्था भवन्ति। किंभूताः। दूरमत्यर्थं निहितं त्यक्तं पापं यैः। करणं कायस्थ[3]साधनेन्द्रियकर्म[4]। प्राप्तये इति नमःस्वस्तीत्यादिना चतुर्थी।।५८।।

५९. **शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः**
संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरिभिः।
निर्ह्लादी ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-
त्सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः।।५९।।

शब्दायन्तेति। तत्र हिमाद्रौ मधुरं यथा स्यात्त(था चे)द्यदि अनिलैः पूर्यमाणाः किचकवंशाः शब्दायन्ते। शब्दं करिष्यन्ति। त(था य)दि सं(र)क्ताभिर्गायनेऽनुरागिणीभि[5]र्मधुरस्वराभिर्वा किन्नरिभिः त्रिपुरस्य विजयो गीयते। तथा कन्दरेषु पर्वतगुहासु निर्ह्लादी गम्भीरमधुरोपमानस्ते तव ध्वनिः मुरज इव मृदङ्गवत्स्यात्। तदा ननु। भो जीमूत ! पशुपतेरीश्वरस्य सङ्गीतमेवार्थः सङ्गीतस्यार्थो वाभिधेयः समग्रः सम्पूर्णो भावि भविष्यति। वेणुमात्रेऽपि कीचक इति। "वंशकण्ठमृदङ्गानां शब्दैः संगीतकं विदुरि"ति [पुरुषोत्तमः] ।।५९।।

६०. **प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्**
हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः।।६०।।

*A17a*प्रालेयेति। प्रालेयाद्रेः। हिमवतः। उपतटम्। तटे तान् तान् श(र)भा(दी)न् विशे(षान्) अति(क्रम्य)। तेन मार्गेण उदीचीं उत्तरां दिशमनुलक्षीकृत्य अनुसरेश्च गमिष्यसि। तेन इति केन। यत्क्रौञ्चरन्ध्रं क्रौञ्चनाम्नः पर्वतस्य रन्ध्रम्।

---

1. **A** omits this word
2. **A** सिद्धैर्विद्याधराभिः
3. **A, B** कायकायस्थ
4. **A, B** कर्मस्थ
5. **B** रागिभि

किंभूतम्। हंसानां द्वारमिवद्वारम्। मानसगमनागम*B29a*नकारणम्। पुनः किंभूतम्। भृगुपतेः प(रशुरा)मस्य (यश)सां व(र्त्म मा)र्गः। (श)रप्रकारमा(त्रेण)। किंभूतम्। तिर्यगायामो (नि)र्देशात्। तिर्यग् वक्रीभूतः। किंभूतः। आयामो दैर्घ्यं तेन शोभितुं शीलमस्येति। उपमानमाह। श्याम इति। बलेर्दैत्यस्य नियमनाय विनीतकरणाय बन्धनायाभ्युद्यतस्य विष्णोस्त्रिविक्रमस्य श्यामः पाद इ(व)।।६०।।

६१. **गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः**
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।
शृङ्गोच्छ्रायैः कुमुदवि{श}[1]दैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः।।६१।।

पञ्चभिः श्लोकैः सुखास्पदत्वमाह। गत्वेति। कैलासस्योपरि त्रिदशवनितादर्पण-स्यातिथिः स्याः। अभ्यागतो भव। त्रिदशवनितानां देवस्त्रीणां दर्पणस्य उदीच्या उर्ध्वमुपरिदेशं गत्वा कैलासस्यातिथिः स्याः। अभ्यागतो भविष्यसि। किंभूतस्य। दशमुखस्य रावणस्य भुजैरुच्छ्वासिता प्रसारिकृता प्रस्थस्तस्य सानोः सन्धेरवयवो यस्य। पुनः किभूतस्य। त्रिदशानां देवानां वनितानां दर्पण इव। दर्पणः स्फटिकमयत्वादीदृशस्य। न केव(लं हिमव)त इत्यर्थः। रावणतुलितत्वात्स्वल्प-परिमाणमाशंक्याह। यः कैलासः शृङ्गाणामुच्छ्रायैरुच्छ्रितश्चाङ्गैः प्रतिदिशम्। दिशो दश खमाकाशं वितत्य व्याप्य स्थितः। किंभूतैः। कुमुदवि{श}[2]दैः कुमुदवच्छुभ्रैः उपमानमाह। गुणीति। त्र्यम्बकस्य *B29b* राशीभूतोऽट्टहास इव। महाहास इव। शुभ्रत्वात्। अत्र किल रावणेन कैलासं भुजैरुत्पाट्य लङ्कां नेतु(मि)ष्टो रावणभुजवीर्यकम्पिता कात्यायनी संभ्र(मा)लिङ्गितेन हरेण पादाङ्गुष्ठेन पीडित इति पौराणिकी कथा। (अ)राशी राशीभूत इति च्वि। अद्भू(तोप)मेयम्। यदुक्तम् -

"सर्वपद्म(प्र)भासारः समाहृ[3]त इव (क्व)चित्।
तदाननं (विभा)तीति ताम(द्भू)तो(प)मां विदु"रिति।। [काव्यादर्शः २.३८]।।६१।।

६२. **उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे**
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य।

---

1. **A** ष
2. **A, B** ष
3. **A, B** हि

शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रिमं-
सन्यस्ते सति हलभृतो मेचके वाससीव।।६२।।

*A17b*उत्पश्येति। हे मेघ ! त्वयि तटगते सति। (त)टं प्राप्ते सति। तस्याद्रेः (कै)लासस्य भवित्रीं[1] भविष्यन्तीं शोभामहं उत्पश्यामि। उत्प्रेक्षे। मन्ये इति यावत्। किंभूताम्। स्तिमितेन निश्चलेन नयनेन प्रेक्षणीयां दर्शनयोग्याम्। किंभूते। स्निग्धस्य पर्वतस्य उज्ज्वलस्याञ्जनस्य कज्जलस्य {आ}भा[2] इव {आ}भा[3] कान्तिर्यस्य यस्मिन् वा। किंभूतस्य। सद्यः कृत्तस्य तत्क्षणकर्त्तितस्य निर्मलस्य द्विरदस्य दशनस्य हस्तिदन्तस्य छे(द वि)च्छि(न्ना)वयवस्य[4]। उपमानमाह। कं केव। मेचके कृष्णे वाससीवाङ्गिनस्ते स्कन्धप्रदेशे आरोपिते सति हलरतो बलदेवस्य इव। ईदृशी शोभा। यथा सर्वप्रेक्षणीयो भवति। *B30a* तद्वत्। अद्भूतोपमेयम्।।६२।।

६३. **तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता**
क्रीडाशैले यदि च विचरेत्पाद-चारेण गौरी।
भङ्गीभक्त्या विरचितवपुस्तम्भितान्तर्जलौघः
सोपानत्वं व्रज पदसुखस्पर्शमारोहणेषु।।६३।।

तस्मिन्निति। (तस्मि)न् क्रीडाशैले। सा पार्वती पा(दरा)गेण चरणग(त्या) यदि (विच)रेद् भ्रमणं कुर्यात्। (तदा)रोहणेषु उपरिस्थानमार्गेषु पादयोः सुखं सु(ख)हेतु स्पर्शो यस्मिन् ईदृशं सोपानत्वं व्रज। यास्यसि। किंभूतः सन्। भङ्गी वक्रत्वं यस्य विद्यते। अत एव भक्त्या (वि)भागरचनाविशे(षेण र)चितं वपुः शरीरं येन ईदृशः सन्। पुनः किंभूतः सन्। स्तम्भितो विधृतोऽन्तः[5] शरीराभ्यन्तरे जलौघो येन स तथा। किंभूता। भुजगानां सर्पाणां वलयं कङ्कणं हित्वा त्यक्त्वा। शम्भुना ईश्वरेण दत्तः हस्तो यस्याः[6]। उत्थाना(र्थ)मित्यर्थात्। एतेन गौरीभुजनिवृत्तये सर्पकङ्कणमभिलक्षितमपि शम्भुस्त्यक्तवान्। अन्यथा सर्पभीत्या नोपर्युपतिष्ठति।।६३।।

६४. **तत्रावश्यं वलयकुलिशोद्घटनोद्गीर्णतोयं**
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।

---

1. **B** omits the word
2. **A, B** omit the word
3. **A, B** भा
4. **B** reads as विच्छिन्नावयवो अङ्गो यस्य
5. **B** विधृतो अन्तः
6. **B** यस्य

ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्
क्रीडालोला: श्रवणपरुषैर्गर्जितैर्भाययेस्ता:।।६४।।

*A18a*तत्रेति। तत्र कैलासे सुराणां देवानां युवतय:। अव(श्यं) निश्चयं यन्त्रेण गृहोपरि काष्ठमयेन धारावृष्टिस्त(दव)शिष्टं यन्त्रगृहभावं त्वां नेष्यन्ति। किंभूतम्। वलयानां कङ्कणगणानां कुलिशस्य हिरकस्य संघटनेन संघर्षणेन उद्गी *B30b*र्णंतोयं येन। एतेन (सु)न्दरीवृन्दपरिरम्भसम्भ(वो) व्य(ज्य)ते। वृन्दा(र)कसु(न्द)रीवृन्दलीलोपा(सि)तस्य म(म) कुत: प्रस्थानमाह। ताभ्य इति। हे सखे ! ताभ्य: सुरयुवतीभ्य: (स)काशात्। घर्मणि उष्णकाले लब्धस्य प्राप्तस्य त(व य)दि मोक्ष: परित्यागो न स्यात् (त)दा ता: क्रीडायां जलकेलौ लीलाश्चपला: सतृष्णा वा सुरयुवतय:। श्र(व)णानां (प)रुषै: कटू(भि)र्गर्जितैर्भिषये:। भीता: करिष्यसि। "प्रतिभित्तिजलश्राावियन्त्रधारागृहं विदुरि"ति [शाश्वत:]। यदुक्तम् –

"निगूढास्थिशिराशीता स्निग्धा मधुरभाषिणी।
ग्रीष्मे शरदि सेव्येयं ज्ञे{या}[१] भ्रमणहिते"ति।।६४।।

६५. **हेमाम्भोजप्रसविसलिलं मानसस्याददान:**
कुर्वन्कामात् क्षणमुखपटप्रीतिमैरावतस्य।
धुन्वन्वातै: सजलपृषतै: कल्पवृक्षांशुकानि
छायाभि{न्नं}[२] स्फटिकवि{श}[३] दं निर्विशेस्तं नगेन्द्रम्।।६५।।

हे(मे)ति। हे मे(घ)! (कं) नगं गिरिव(रं) कैलासं निर्विशे:। निर्भरमुपभोक्ष्यसे। किंभूतम्। छायया तव प्रतिविम्बेन। भिन्नं छुरितमपि परमार्थतो निर्मलम्। किंभूत: सन्। मानसस्य स हं(स:) सलिलं जलं कामात्कुतूहलात्। आददानो गृह्णन् सन्। किंभूतम्। हे(मा)म्भोजं पद्मं प्रसवितुं शीलं यस्य। किं कुर्वन्। क्षणमर्द्धवेलं (ऐ)रावतस्य क्रीडार्थमागतस्य मुखे पटेन चित्रपटे प्रीतिं परि*B31a*तोषं कुर्वन्। पुन: किंभूतम्। वातै: कल्पवृक्षा(णामं)शुकानि तनुं वासांसि (धु)न्वन् कम्प(य)न्। किंभूतै:। सजलपृषतै: जलकणासहितै:। मानस ! हेमाम्भोजस्य कल्पवृक्षस्य च सेवनादलकाप्रवेशे मङ्गलं व्यज्यते।। यदुक्तम् - "प्रस्थाने च प्रवेशे (च) मङ्गलामङ्गले समे।" नि{र्वे}[४]शे उपभोगे चेति।।६५।।

1. **A, B** ज्ञेयं
2. **A, B** न्ना
3. **A, B** ष
4. **A, B** र्वि

६६. **तस्योत्सङ्गे प्रणयिन इव {स्र}[१]स्तगङ्गादुकूलां**
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानै
र्मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्।।६६।।

*A18b*तस्योत्सङ्गेति। हे कामचारिन्। त(स्य) कै(ला)सस्य उत्सङ्गे क्रोडदेशे। अलकां पुनर्दृष्टवा न न ज्ञास्यसे। अपि तर्हि ज्ञास्यसि एव। प्रणयिन इव। प्रियतमस्येव। किंभूताम्।{स्र}[२]स्ता स्वयं विगलिता गङ्गादुकूलमिव यस्याः। यथा प्रियतमस्योत्सङ्गे स्थिता कामिनी अनुरागविशेषेण {स्र}[३]स्तदुकूलं भवति। तथा सापि। कामचारित्वेन पूर्वमपि त्वं तत्रागतवानेवेति सम्बोधनेन व्य(ज्य)ते। एतदेव द्रढयन्नाह। या व इति। या अलका कालेषु वर्षाकालेषु उच्चैर्वि(मा)नैरुपर्यधो स्थि(त)सप्तकाष्ठप्रासादविशेषै (र्युष्मा)कं मेघानामभ्रवृ(न्दं) मे(घ)समूहं वहति। किंभूतम्। सलिलं जलमुद्गिरतीति। उपमानमाह। मुक्तेति। मुक्तानां जालैः समूहैर्ग्रथितमलकम्। कामि(नी)व उ*B31b*त्सङ्ग इत्यनेन कामिनो रतार(म्भं) सूच्यते। यदुक्तम्-

"एवंविधे वासगृहे (वि)लासिनी रतोत्सवार(म्भवि)शेषवेदिनी।
सदानुकूले{ऽ}तिशयेन[४] यत्नतां विधाय तल्पेऽङ्कतलेऽथसादरम्।।"

इति। "देवयानं वि(मा)नं स्यात्सप्तकोणविवेश्म" इति।।६६।।

६७. **विद्युत्वन्तं ललिनवनिताः सेन्द्रचापं सचित्राः**
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः।।६७।।

अष्टाभिः कुलकम्। विद्युत्वन्तमिति। पूर्वक्रियान्वयः। यत्रालकायां प्रासादा देवगृहाणि हर्म्याणि वातैर्विद्युदादिभिर्विशेषैः त्वां तुलयितुं सदृशीकर्त्तुमलं समर्थाः। तां पुनरित्यादियोज्यम्। उभयोस्तुल्यविशेषणमाह। विद्युदिति। किंभूतम्। विद्युत्वन्तम्। (वि)द्युद्विद्यते यस्य स विद्यु(द्वा)न् तं तथा। तव विद्युद्व(नि)ता स्त्रीत्यर्थः। किंभूताः। ललिताः शृङ्गारचेष्टायुक्ता वनिताः सुन्दर्यो येषु। पुनः किंभूतम्। स्निग्धो मधुरो ध्वनिर्यस्य।

---

1. **A** श्र
2. **A, B** श्र
3. **A, B** श्र
4. **A, B** सदानुकूले यातिशयेन

किंभूता:। संगी(ताय) प्रहता गदिता मुरजा: मर्दला येषु। किं(भू)तम्। (अ)न्तर्मध्ये तोयं जलं यस्य। किंभू(ता:) मणयो मुक्तादय: प्रस्तुता यासु। ईदृश्यो भूवो येषु ते तादृशीमणीनां शुभ्रत्वात्तोयै: साम्यम्। किंभूतम्। तुङ्गमुच्चम्। किंभूता:। अभ्रमाकाशं लिहन्तीति स्पृ*B32a*शन्तीति[१] वह(न्ति) इत्यादिना ख:। एतादृशान्यग्राणि ये(षां) ते (त)था।।६७।।

६८. **हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं**
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्री:।
चूडापाशे नवकुरुबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्।।६८।।

*A19a*हस्तेति। वधू(ना)मिति सर्वत्र सम्बन्ध:। यत्रालकायां वधूनां हस्ते लीलायै कमलं पद्मं भवति। अलकं बालै(र)भिनवै: कुन्दपुष्पैरनुविद्ध्य उत्खचितम्। लोध्रस्य प्रसवानां पुष्पाणां च जपापरागे आननस्य मुखस्य श्री: शोभा पाण्डुतां नीता। "अ(ल)के लोध्र(प्र)धानात् चूडापाशे धमि(ल्ल)विशेषे" [सर्व:]। चारु मनोहरं नवं कुरुबकं रक्ताम्लानपुष्पम्। कुरुबक इति वकारयुक्तपाठे पक्षे पुष्पविशेषो वा द्र(ष्ट)व्य:। तदुक्तम्। "तिलपुष्पे कुरुबकस्तथा कुरुवकेऽपि च।" कर्णे शिरीषपुष्पम्। सीमन्ते केशपाशे तस्य[२] विभागे तवोपगमनाज्जातं नीपं कदम्बपुष्पं कुसुमं भवदागमनजातत्वाच्छिरोधार्यमिति भाव:। कुरुवकादीनामिह नपुंसकं द्विहीनत्वात्। द्विहीनं प्रसवे सर्वमिति।।६८।।

६९. **यस्यां यक्षा: {सि}[३]तमणिमयान्येत्य हर्म्यस्थलानि**
रत्नच्छायाकुसुमरचिता-न्युत्तमस्त्रीसहाया:।
आसेवन्ते मधु रतिरसं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकै: पुष्करेष्वाहतेषु।।६९।।

यस्यामिति। यस्यामलकायां यक्षा: देवयोनिविशेषा: उत्तमस्त्रीसहाया: सन्त: मधुमद्यमासेवन्ते। तां पुनरित्यादियोज्यम्। कल्पवृक्षात् प्रसूतमुत्पन्नम्। पुन: किंभूतम्। रतौ सुरते रसो रागो यस्य। किं कृत्वा। {सि}[४]त*B32b*मणि(मयानि)[५] सौधगृहाणि

1. **B** The second one handwriting is restarted from this word.
2. **B** केशपाशस्य
3. **A** शि
4. **A, B** शि
5. **B** omits मयानि

हि स्थलान्युपरिष्ठानि एत्य प्राप्य। किंभूतानि। {सि}[1]तमणिभिः कृष्णवर्णरत्नविशेषैरिन्द्रनीलप्रभृतिभिः कृत्वा विभूषितानि नानारूपेणोत्पादितानि। अत एव ज्योतिषां नक्षत्राणां छायया प्रतिविम्बेन कुसुमरचना पुष्पाणां विशेषो येषु। मणीनां निर्मलत्वात्। अथवा रतिरसं मूर्त्तिमत्सु रतानुरागं केषु सत्सु मधु पिवतीत्याह। त्वदिति। त्वदेव गम्भीरो ध्वनिर्येषां तेषु पुष्करेषु मृदङ्गपुटेषु शनकैर्मन्दमन्यमाह। तेषु वाहितेषु सत्सु उत्तमस्त्रियः पद्मिन्यः।

"पद्मिनीं तदनु चित्रिणीं त(तः) शङ्खिनीं तदनु हस्तिनीं {विदुः}[2]।
उत्तमा प्रथमभाषिता ततो हीयते युवतिरुत्तरोत्तरं पद्मिनी यथा।।" [रतिरहस्यम् १.१०]

"कमलमुकुलमृद्वी फुल्लराजीवग{न्धा}[3] सुरतपयसि यस्याः सौरभं दिव्यमङ्गे।
चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे स्त(नयुगल)मनर्घ श्रीफलश्रीविडम्बि।।"

[रतिरहस्यम् १.११]

"तिलकुसुमसमानां विभ्रती नासिकां च द्विजगुरुसुरपूजां श्रद्दधाना सदैव।
कुवलयदलकान्तिः कापि चाम्पेयगौरी विकचकमलकोषाकारकामातप*B33a* {त्रा}[4]।।"

[रतिरहस्यम् १.१२]

"व्रजति मृदु सलीलं राजहंसीव तन्वी त्रिवलि(क)लितमध्या हंसवाणी सुवेणी।
मृदु शुचि लघु भुङ्क्ते मानिनी (का)न्तलाभाद्धवलकुसुमदामवल्लभा पद्मिनी स्यात्।।"

[रतिरहस्यम् १.१३]

"पुष्क(रं) करिहस्ताग्रे वा(द्य)भाण्डमुखे जले।" [अमरः] ।।६९।।

७०. **गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः**
कृष्णा[5]च्छेदैः कुवलयदलैः[6] कर्णविभ्रंशिभिश्च।
मुक्ताजालैः स्तनपरिसरैश्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्।।७०।।

1. **A, B** शि
2. **A, B** विदुरिति
3. **A, B** न्धः
4. **A, B** त्राम्
5. Text reads as कृष्णः। But commentary reads as क्लृप्तः।
6. Text reads as कुवलयदलैः। But commentary reads as कनकनलिनैः।

*A19b*गत्युत्कम्पेति। यत्रालकायां सर्वत: सूर्यस्योदये[१] कामिनीना(म) भिसारिकाणां नैशो मार्गसंकेतीकृतस्थानं निशा(ग)मनमार्ग: एभिर्विशेषै: सूच्यते। कथयति। तामित्यादि योज्यम्। एभिरिति। कै:[२]। मन्दारकस्य तरो: पुष्पै:। किभूतै:। गतौ गमने उत्कम्पात्(गति)वशात्भावउद्दी(र्ण?)गात्रचलनात्कदाचित् कोऽपि जानातीति शङ्कावशाद्वा शरीरकम्पनाद्धेतो: अलकेभ्य: पतितै:। पुन: किंभूतै:। कनककनलिनै: सुवर्णनिर्मितपद्मताटङ्कै:। किंभूतै:। कर्णविभ्रंशनशीलै:। अध: पतितै:। पुन: किंभूतै:। क्लृप्तो विरचितच्छेद: पत्रच्छेदो येषां तै:। पुन: कै:। हारै:। किं भूत्वा। तै: मुक्तानां जालै: समूहै: मुक्ताजालकेति चेक प्रसिद्धे:। पुन: किंभू*B33b*तै:। छिन्नं सूत्रं येषां तै:। पुन: किंभूतै:। स्तनपरिसरै: स्तनपर्यन्तं परिसरो येषां तै:। एतेन हाराणां छिन्नसूत्रत्वे मुक्तासमूहानां एकैकंशोऽध:पतनमित्यर्थ:। गत्युत्कम्पादिति।[३] सर्वत्र सम्बन्ध:। "आनाय: पुंसि जालं स्यादिति" [अमर:] । वेष्टनं स्यादिति परिसर इति। अभिसारिका यथा-

"रूपयौवनसम्पन्ना कुलभोगधनाधिका। वासोऽङ्गरागमाल्यर्तुवन्दनेन्दुदयादिभि:।[४]
उद्दिप्यमानपञ्चेषु पञ्चवाणप्रतापिता[५]। याऽभिसारयते कान्तं सा भवेदभिसारिका।।"

[भावप्रकाशनम्-४/१६७] ।।७०।।

७१. **आनन्दोऽत्थं नयनसलिलं यत्र नान्यैर्निमितै-**
रन्यस्तापो न कुसुमशरादिष्टसंयोगसाध्यात्।
नान्यां यत्र प्रणयकलहाद्विप्रयोगोपपत्ति-
र्बित्तेशानां न खलु वयसो यौवनादन्यदस्ति।।७१।।

(टीका नोपलभ्यते)

७२. **नीवीबन्धोच्छ्वसितशिथिलं यत्र यक्षाङ्गनानां**
वास: कामादनिभृतकरेष्वाक्षिपत्सु प्रियेषु।
अर्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
ह्लीमूढानां भवति विफलप्रेरणा चूर्णमुष्टि:।।७२।।

*A20a*नीवीबन्धेति। तत्रालकायां प्रियेषु कामीजनेषु वासो दुकूलं

1. **B** सूर्योस्योदये
2. **A** तत:
3. **B** is completed here.
4. **A** वासोऽङ्गरागमाक्रान्त च नवेन्दुदयादिभि:
5. **A** पञ्चवाण: प्रतापिता

कामादनुरागादाक्षिपत्सु आ(हर)त्सु सत्सु यक्षाङ्गनानां चूर्णमुष्टिः कर्पूरक्षोदमुष्टिः रत्नान्येव प्रदीपान् प्राप्य विफलप्रेरणा विफलप्रयोजनस्थापना भवति। किंभूतान्। अभिमुखगतान्। स्त्रीपुरुषयोः समुखस्थितान्। पुनः किंभूतान्। (अर्चि)षा दीप्त्या तुङ्गान् म(ह)तो देदीप्यमानान्। ह्रीमूढानां लज्जया मूढानाम्। किंभूतेषु। अनिभृताः संकुचिताः करा येषु। किंभूतम्। नीव्या वस्त्राञ्चलग्रन्थेर्बन्धनस्य तत्तया उच्छ्वसनेन शिथिलं नीवीमुकुलनात् (बन्धो) वा खेदादिवत्सु। अत एव भवतीति उत्कण्ठाविशेषात्। तदुक्तम्-

"{धैर्यस्थगितवार्त्तानां}[1] योषितां सन्धिका यथा। भवति शिथिलं वस्त्रं नितम्बान्नीविबन्धनमिति"।।७२।।

७३. **मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-**
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।
अन्वेष्टव्यैः कनकसिकतामुष्टिविक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः।।७३।।

मन्दाकिन्येति। हे पयोद ! मन्दाकिन्याः मणीति माणिक्यादिभिः संक्रीडन्ते। मधुराः स्त्रियः (संक्री)डन्ते विहरन्ति। ता(मित्यादि) योज्यम्। किंभूतैः। कनकसिकतायां मुष्ट्या विक्षेपेण गूढैः। संवृतैः। अन्वेष्टव्यैः। किंभूताः। अ(म)रैर्देवैः प्रार्थिताः। पुनः किंभूताः। मरुद्भिः पवनैः सेव्यमानाः। किंभूतैः। मन्दाकिन्याः देवगङ्गायाः सलिलेन शिशिरैः शीतलैः। पुनः किंभूताः। मन्दाराणां कल्पपादपानां छायया वा(रि)तः निरस्तः (वारितोष्णाः) यासां तास्तथा। किंभूतानाम्। मन्दाकिन्या (अनुतटं) रोहन्ति जायन्ति इति क्विप्। सुरप्रार्थनया सर्वस्य विहारयोग्यता व्यज्यते। यदुक्तम्-

"लक्षणैरन्विता कन्या प्रशस्ता (या) चलेक्षणा।
मनस्त्वं दर्शनीयां तां (सम्भावयि)तुमर्हसि।।"

तत्रालकादर्शनेन चापि विवाहाभिलाषः सम्पत्स्यन्ते। एवं (xxxxxxxx xxxxx)त्वात्। पुनः स्नेहादिभिः ताः सुशिरः स्वयम्भराः। कि(म्बा) सु(शिरः) खलु चा(xx)। जना धन्या लभन्ते। अत्र सति (xxxxxx) रो(xxx)। क्षेपोऽयम्।।७३।।

७४. **नेत्रा नीताः सततगतिना ये विमानाग्रभूमी-**
रालेख्यानां स्वजलकणिकादोषमुत्पाद्य सद्यः।

---

1. A धैर्यस्थगितवर्त्तीनां

शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति।।७४।।

*A20b*नेत्रेति। तत्रालकायां त्वाद्वशास्त्वत्सदृशा जलमुचो जालैः जालकैः। जर्जराः खण्डखण्डीभूताः सन्तः च निष्पतन्ति। तां पुनरित्यादि योज्यम्। किंभूताः। धूमानामुद्गारस्य उद्गीरणस्यानुकृतौ सा(दृश्ये) निपुणाः दक्षाः। पुनः किंभूतः। सततगतिना वा तेन। (वि)मानस्य सप्तकोष्ठगृहस्य (सौध)स्याग्रभूमीरुपरिस्था(व)नी नीताः। आ(लेख्या)नां गृहं गृहभूमिं चोपरि(भूमिका) नीताः। नेत्रा प्रेरणशीलेन। किं कृत्वा। आलेख्यानां चित्राणां स्वस्य जलस्य कणिकाभिर्दोषं ग्लानिं सद्यस्तत्क्षणादुत्पाद्य। शङ्का भयेन स्पृष्टा इव। गृहिता इव।।७४।।

७५. **यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गिता-**
नामङ्गग्लानिं सुरतजनितां तन्तुजालावलग्नाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादैश्चोदिता
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः।।७५।।

यत्रेति। यत्रालकायां स्त्रीणामङ्गग्लानिं चन्द्रकान्ताः मणयः व्यालुम्पन्ति स्फोटयन्ति। तामित्यादि योज्यम्। किंभूताम्। सुरतेन जनिताम्। पुनः किंभूतानाम्। प्रियतमानाम्। भुजैरुच्छ्वासितां प्रतोलितानाम्। प्रेमालिङ्गितानाम्। अथवा प्रियतमभुजोरुच्छ्वासितं आलिङ्गितं यासाम्। एनं यक्षं पुनरहं मन्ये। तन्तूनां सूत्राणां जालेन समूहे अवलम्बोऽवलम्बनं येषाम्। किंभूताः। स्फुटन् व्यक्तान् जलानां लवान्। पुनः पुनः स्यन्दन्तीति। ते पुनः किंभूताः। चन्द्रपादैः रश्मिभिः चोदिताः प्रेरिताः। किंभूतैः। तव संरोधस्यावरस्यापगमनानुभावेन वि{श}[1]दैर्निर्मलैः।।७५।।

७६. **मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं**
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्।
सभ्रूभङ्गं प्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चटुलवनिताविभ्रमैरेव सिद्धः।।७६।।

*A21a*मत्वेति। यत्रालकायां प्राय एवं मन्ये। मन्मथः कामः। धनपतेः कुवेरस्य सखायं मैत्रं देवं त्रिलोचनं साक्षात् प्रत्यक्षं वसन्तं स्थितं मत्वा ज्ञात्वा धनुभयात्भस्मीभूतः त्रासान्न वहति। तामित्यादि योज्यम्। किंभूताः। षट्पदा भ्रमरा एव। ज्या गुणो यत्र। धनुष्टङ्कारानुरुपशब्दकारित्वात्। कथं तर्हि शरव्यापारमन्तरेण कामार्त्ति(ता प्र)जायते।

---

1. A ष

अत आह। तस्येति। तस्य मन्मथस्य कामिलक्ष्येषु आरम्भोऽनुष्ठानम्। चटुलानां वनितानां विभ्रमैर्विकासैरेव सिद्धो निष्पन्नः। किंभूतैः। भ्रूवोर्भङ्गेनाकुञ्चितेन प्रहितानि नयनानि येषु। तैः। पुनः किंभूतैः। स अमोघैः सर्वत्र सफलैः। प्राय इत्युत्प्रेक्षासूचनम्। अत्र भ्रूश्चापम्। शराः कटाक्षाः। शराः कामिनो लक्षाणीति। ईश्वरनिवासाद्धर्मः। धनपतेरधिष्ठानाद्धनम्। विलासिनीविभ्रमबाहुल्यात्कामः।।७६।।

७७. **तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं**
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योद्याने कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः।।७७।।

तत्रेति। तत्रालकायां धनपतेः कुवेरस्य गृहादुत्तरेणोदीचीदिशा अस्तीति सम्बन्धः। उत्तरेणेति प्रकृत्यादिभ्यः उपसंख्यानमिति तृतीया। नत्वेन प्रत्ययान्तः। किंभूतम्। सुरपतेरिन्द्रस्य धनुषेव चारुणा मनोहरेण नानामणिमयरूपेण ईदृशेन तोरणेन त्वं हि द्वा{रेण}[१] कृत्वा दूराद्दूरं अध्वास्य लक्ष्यं लक्षणीयम्। दूरादिति ल्यब्लोपे पञ्चमी। कस्य गृहस्योद्याने उपवने बालमन्दारवृक्ष(द)र्श(नात्)। किंभूताः। स्वकान्तया व(र्द्धि)तः। पुनः किंभूतः। अत एव कृतकतनयः। कल्पितपुत्रः। पुनः किंभूतः। हस्तेन प्राप्य प्राप्तः शक्यः। स्तवकः पुष्पगुच्छस्तेन नमितः। तत्रागारमिति योज्यम्। तादृशबालमन्दारवृक्षो निजभवनचिह्नम्।।७७।।

७८. **वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा**
हैमैश्छन्ना कमलमुकुलैः स्निग्धवैदूर्यनालैः।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
न ध्यास्यन्ति व्यपगतशु{च}[२] स्त्वामपि प्रेक्ष्य हंसाः।।७८।।

*A21b*वापीति। अस्मिनुद्याने वापी अस्ति। किंभूताः। मरकतशिलाभिर्बद्धः। सोपानस्यावतरणस्य मार्गो यस्याः। पुनः किंभूताः। कम(ला)नां मुकुलैरिषद्विकसितकलिकाभिश्छन्नाः। किंभूतैः। हेमैः सुवर्णभूमैः। पुनः किंभूतैः। स्निग्धान्यपरुषाणि वैदूर्याणि नालानि येषां तैः। न केवलं बालमन्दार इत्यर्थः। यस्या वाप्यास्तोये पानीये कृतवसन्तीति हंसास्तैः। ते हंसास्त्वामपि मेघं प्रेक्ष्य हृष्टा संनिकृष्टं संनिहितं मानसं सरः नाध्या(स्य)न्ति। न स्मरन्ति। न हि आ(गमि)ष्यन्ति। रमणीयाः। किंभूताः। गताः शोकाः येषां ते तथा। एतदपि निजभवनज्ञानचिह्नम्।।७८।।

1. **A** द्वारणे
2. **A** र

७९. यस्यास्तीरे रचितशिखर: पैशलैरिन्द्रनीलै:
क्रीडाशैल: कनककदली-वेष्टनप्रेक्षणीय:।
मद्गेहिन्या: प्रिय इति सखे ! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि।।७९।।

यस्येति। यस्या वाप्यास्तीरे क्रीडार्थं शैल: पर्वतश्चास्ति। किंभूत:। ईन्द्रनीलैर्मणिविशेषै: रचितानि शिखराणि यस्य। किंभूतै:। पेशलैर्मनोहरै:। तथा च। "गिरौ दक्षे च पेशल" इति [अमर:]। किंभूत:। कनकस्य सुवर्णस्य कदलीनां वेष्टनेन प्रेक्षणीयो दर्शनीय:। भो सखे ! त्वां प्रेक्ष्य इति हेतोश्चेतसा चित्तेन त(न्मये)न क्रीडाशैलं स्मरामि। किंभूतेन। कातरेण कामाविष्टेन। किंभूतम्। उपान्ते समीपे स्फुरिता व्यक्तिभूता तडित् यस्य तम्। इति। इति किम्। म(द्गे)हिन्या: प्रियाया: प्रियोऽयमिति मत्वा। एतदपि भव(न)ज्ञानचिह्नम्।।७९।।

८०. रक्ताशोकश्चलकिसलय: केशरस्तत्र कान्त:
प्रत्यासन्न: कुरुवकवृतेर्माधवीमण्डपस्य।
एक: सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्या:।।८०।।

*A22a*रक्तेति। तत्र क्रीडाशैलेऽशोकश्चास्ति। किंभूत:। चलानि किशलयानि यस्य। किंभूत:। रक्त: रक्तवर्ण:। (नवज)लावृतत्वात्। तथा केशरो बकुलो रक्तसंभृत:। क्रीडामनोहर:। उभयविशेषणमाह। कुरुवकानां शोणिम्नानां वृतिराव(र)णविशेषो यस्य। ईदृश्या माधव्या अतिमुक्तलतायां विरचितमण्ड-पाकार(लताभेद)स्य प्रत्यासन्न:। समीपवर्त्ती। तयोर्मध्ये एक: प्रथमो रक्ताशोक: दोहदस्य पुष्पादिनिदानस्य छद्मना कपटेन तव सख्या मित्रभार्या या मया सह वामपादाभिलाषी वामपादेऽभिलाषो यस्यास्तीति। एतेन वामपादेन अभिघातमभिलषतीत्यर्थ:। अन्यो बकुल: अस्या मम कामिन्या वदनस्य मुखमदिरां दोहदच्छद्मना मया सह कांक्षति वाञ्छति। एतदपि स्वभवने ज्ञाने चिह्नम्। व्याजमात्रं दोहदमिति। यक्षस्योत्प्रेक्षा। एक: पादस्पर्शनं (त्व)परो मुखमद्यम्। प(द)स्य स्पर्शनेन मुखस्पर्शमाकांक्षेत्यर्थ:।।८०।।

८१. तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशै:।
तालै: {शि}[1]ञ्जद्वलयसुभगैर्नर्तित: कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठ: सुहृद्व:।।८१।।

---

1. **A, B** सि

तन्मध्येति। तयोरशोककेशरयोर्मध्ये वासाय मयूरस्य निवासार्थं यष्टिरस्ति। किंभूता। काञ्चनमयी सुवर्णरचिता। पुनः किंभूता। स्फटिकनिर्मितं फलकं काण्डस्योपरि (पीठि)का यस्याः सा तथा। किंभूता। मणिभिर्मरकतैर्मूले बद्धा विरचिता। किंभूतैः। अनतिप्रौढस्या- चिरजातस्य वंशस्येव प्रकाशो येषां तैर्हरितवर्णैः। (नीलकण्ठो) मयूरः दिवसविगमे दिवसावसाने यां यष्टिम(ध्यास्ते) इत(यर्थः)। व(स)तिं यातीति। "अधीशीङ्स्थासां कर्म" [अष्टाध्यायी]। किंभूतः। वः युष्माकं सुहृद्बन्धुः। मेघदर्शने प्राप्तमोहत्वात्। पुनः किंभूतः। मे मम वार्त्तायास्तालैः करपटनिनादैर्नर्त्तितः। किंभूतैः। {शिं}[1]जित यत्र। मधुरशब्दायमानेन वलयेन। सुभगैर्मनोहरैः।।८१।।

८२. **एभिः साधो ! हृदयनिहितैर्लक्षणैर्लक्षयेथा**
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
मन्दच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्।।८२।।

*A22b*एभिरिति। हे साधो ! हे मेघ ! प्रचुरसाधारणसम्बन्धः। एभिः पूर्वोक्तकैः हृदयनिहितैः (स्थापितैः) लक्षणैश्चिह्नैः। कृत्वा भवनं लक्षयेथाः। ज्ञास्यसि न केवलमेतैः। तथा शङ्खपद्मौ च निधी दृष्ट्वा। किंभूतैः। द्वारस्योपान्ते समीपे लिखितं वपुश्शरीराकारं ययोः ते तथा। किंभूतम्। नूनमेवं मन्ये। अधुना इहान्वये। (मद्वियोगेन) मम विरहेण मन्दामन्दभूताच्छाया कान्तिर्यस्य। अर्थान्तरमाह। (खलु) यस्मात् सूर्यस्यापाये भावे कमलं पद्मं स्वामात्मीयामभिख्यां न पुष्यति। न धारयति। संकुचितत्वात्। "अभिख्या नाम शोभयोरि"त्यमरः।।८२।।

८३. **गत्वा सद्यः कलभतनुतां तत्परित्राणहेतोः**
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः।
अर्हस्यन्तिर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितिनिभां विद्युदुन्मेषदृष्टिम्।।८३।।

गत्वेति। तस्या मम कान्तायाः परित्राणं रक्षण(हेत)व हेतुः। तस्मात्कलभस्य हस्तिपोतस्य तनुः शरीरं तद्भावं गत्वाऽल्पभावात् कलभसदृशाकारो भूत्वा प्रथमं पूर्वं कथिते प्रतिपादिते क्रीडाशैले केलिपर्वते। सद्यस्तत्क्षणान्निषण्णः उपविष्टः सन् विद्युदुन्मेषदृष्टिमन्तर्भवनपतितां कर्त्तुमर्हसि। विद्युता सौदामिन्या उन्मेषमुन्मिलनदृष्टिस्तां भवनस्यान्तः। अन्तर्भवनं तत्र पतितां

1. A सिं

यासां सा तथा। किंभूतम्। अल्पावभासम्। अल्पावभासो यस्याः सा तथा। पुनः किंभूताम्। खद्योतानां खद्योतरिङ्गणानामल्पाः पंक्तेः विलसितेन निभां कान्त्या इव दीप्तिरिव यस्यास्ताम्। किंभूते। रम्याः रमणीयाः सानवो यस्याः सः। तस्मिन्। समत्वात्। मृदुत्वात्। " कलभः करिशावकः इत्य"मरः।।८३।।

८४. **तन्वी श्यामा शिखरदशना पक्वबिम्बाधरौष्ठी**
मध्ये श्यामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः।।८४।।

*A23a*तन्वीति। तत्र तस्मिन् भवने युवतीनां विषये गोचरे या धातुर्विश्वकर्मणः आद्या प्रथमेव सृष्टिः स्यात्। सर्वगुणसहत्वात् तां जानीयाः। ज्ञास्यसीति वक्षमाणेन सम्बन्धः। प्रथमा सृष्टिरुत्तमा भवति। सर्वसौन्दर्यश्रियां च दृष्ट्वाऽपरां सृजति। उत्तमत्वमेव दर्शयति। सा कीदृशी तन्वी। कृशाङ्गी। श्यामा। "अप्रसूता तरुणी यावत्।" विश्वप्रकाशः। वटे द्रूमे प्रयोगः यस्यां सा। अपि च गुणैः। अप्रसूतायां सूतिकायां च त्रिधासौ लक्ष(णै)षा (स्या)दिति। श्याम(ा) श्यामवर्णेति केचित्। एतत्पुनरसङ्गतम्। या सा (चा)रुः कनककदलीस्तम्भगौरश्च स्निग्धलोहितमाणिक्यमिव दशनं दन्तो यस्याः। सा तथा। तथा च विश्वप्रकाशः। "शिखरं शैलवृक्षाग्रे कक्षापुलककोटिषु। पक्वदाडिमबीजाभा माणिक्यसकलेषु च"। इति। अथवा। शिखरदशना। पक्वदाडिमबीजाभा दन्तेति केचित्। केचित् शिखरदशना ईषद्दन्तुरा इति। एतदेव घटते। महानायिका दन्तुरा भवतीति। पक्वविम्बमिव अधरौ{ष्ठं}[१] यस्याः। सा तथा। मध्ये शरीरमध्ये (मन्द)मुष्टि ग्राह्य मध्या। चकितायाः भीतायाः हरिण्या इव (प्रेक्षणा) नयने यस्याः सा तथा। निम्ना गभीरा नाभिरन्ध्रं यस्याः। तथा अमरः। "निम्नं गभीरं इति।" गम्भीरमिति। श्रोणीभार इव दुर्वहत्वात् तेनालसं मन्दं गमनं यस्याः। सा तथा। तथा चामरः। "कटिश्रोणी ककुद्मतीति।" स्तनाभ्यां स्तोकं नम्रा ईषन्नम्रा। स्तनयो गुरुत्वत्वात् संक्षिप्तवर्णना कृता। न तु सा। एतावत्येव गुणवतीति। भद्रजातीति (या) स्त्री। यदुक्तम्। "भद्रानि (xx)ता हंसा चतस्रो नायिका मता।" भद्रा यथा -

"तन्वी मृणालमृदुबाहुरमन्दमुष्टिग्राह्यातिमुग्धकृशमध्यमनोहरापि।
अर्द्धेन्दुसुन्दरमनोज्ञललाटपट्टरम्यातिसौम्यतनुरून्नतपुंसयोग्या।।"

Ē. **A** ष्ठो

"ललितकण्ठलता कलकोकिलध्वनिरनिन्द्यतराधरपल्लवा।
विनतनाभिरशेषविलासिनी मुकुटरत्नमयत्वं मनोरमेति"।।८४।।

८५. **तां जानीया: परिमितकथां जीवितं मे द्वितीयं**
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ष्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरूपाम्।।८५।।

तां जानीया इति। तामनेकविशेषां वा विशिष्टां (वा) मैनां मे मम द्वितीयं जीवितमिव गृहीतशरीरत्वात् प्रेक्ष्य जीवन(म)ति(न)श्वरं जानीया:। तां कीदृशीम्। परिमितकथाम्। अल्पभाषिणीम्। किंभूते। सहचरे तत्सन्निहिते मयि मत्प्रियतमे इदानीं विवशाद्दूरीभूते सति चक्रवाकीमिव। एकामद्वितीयां सतीमिति यावत्। अत एव गाढोत्कण्ठां विरहेणातीवोत्सुकाम्। अत एव त्वं च *A23b* दिवसे(ष्वेषु)। त्वया पतिवत्नीत्याह। (उत्पादन्यरूपां) बालां जातां सम्पन्नां मन्ये उत्प्रेक्षते। सा युवति(कान्ते)ति। कृशत्वात्कान्तेव सम्पन्नेत्यर्थ:। उपमानमाह। शिशिरेति। शिशिरेण मथितां ध्वस्ताम्। अत एव पूर्वरूपादन्यरूपां पद्मिनीं वा पद्मिनीमिव। "वा विकल्पोपमानयोरिवार्थेऽपि समुच्चये" इति [मेदिनी] । वा शब्द उपमानार्थ:। एतैर्विशेषणपदै: सह (पद्मिन्या) गुणसम्पत्ति: सूचिता। यदुक्तम्-

"स्वपक्षे परपक्षे च पेशला मितभाषिणी।
(ह)रन्ती वपुषा (लो)कान् स्त्रीरत्नमिति ऋच्छतीति"।।८५।।

८६. **नूनं तस्या: प्रबलरुदितोच्छूननेत्रं प्रियाया**
नि:श्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।
हस्ते न्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्विभर्त्ति।।८६।।

नूनमिति। नूनमेवं मन्ये। तस्या मम कान्ताया: मुखं इन्दोश्चन्द्रमसोर्दैन्यं दुर्गतं विभर्त्ति। किंभूतम्। असकलव्यक्ति। असंपूर्णदर्शनम्। कुत: लम्बालकत्वात्। संस्काराभावात् लम्बा दीर्घाऽलका यस्य तस्य भावस्तत्त्वं तस्मात्। इन्दो: किं विशिष्टस्य तवानुसरणेन आच्छादनेन। क्लिष्टापगता कान्तिर्यस्य। पुन: किंभूतम्। प्रबलेनातिमहता रुदिते आगते (उच्छूने सति) न{यने}[1] च। श्लथाङ्गा(नां) चेष्टाभिरूद्वेगात् विभयो भवेति।।८६।।

1. A नयेन

८७. आलोके ते निपतति पुरा सा बलिव्याकुला
वा मत्सादृश्यं विरहतनुता भावगम्यं लिखन्ती।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि निभृते त्वं हि तस्य प्रियेति।।८७।।

आलोकेति। ते तव आलोके दर्शने सति तव छायां पुरोऽग्रे निपतति सति सा मत् प्रियावलोकाकुलार्थाऽर्घदानपूजातत्परा भविष्यति तथा भूता सति मत्सादृश्यं मम प्रतिरूपकं लिखन्ती वा भविष्यन्ती। किंभूतम्। विरहे नियतमिदृश(शोक)लभ्यस्य तनुता भूय इत्येवं यो भावः। हृदयं बुद्धिस्तेन गम्यम्। परिच्छेद्यं यस्य अथवा पञ्जरे तिष्ठन्तीति पञ्जरस्थिताम्। मधुरं कर्णपेयं वचनं यस्या ईदृशीं सारिकामिति पृच्छन्ती वा निपतिष्यति। इतीति किं तत्। कच्चिन्निभृते! भो विनीते! भर्त्तुः स्मरसि भर्त्तारं चिन्त{य}सीति[१]। मधुरैर्वचनैर्भर्त्तारं वर्णयन्ती। मम कर्णकुहरं पीयूषं (पी)*A24a*(त्वा)। किंभूतम्। "कच्चिदिष्टप्रश्ने" [अभिधानचिन्तामणिः] । अथवा हे निभृते ! निःशब्दे ! त्वं भर्त्तुः स्मरसि। कथमन्यथा निभृतं तिष्ठसीति भावः। हि यस्मात् त्वं तस्य प्रिया प्रेयसी। अतः प्रश्ने हेतुः। भर्त्तुरिति। स्मृतीत्यादिना कर्मणि षष्ठी। ननु तस्या विरोधोक्तौ। "कच्चित्कामप्रवेदने" [अमरः] ।।८७।।

८८. उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीरार्द्रां नयनसलिलैः सारयित्वा कथंचित्
भूयो भूयः स्वयममि कृतां मूर्च्छनां विस्मरन्ती।।८८।।

उत्सङ्गेति। हे सौम्य ! हे सुन्दर ! भूयो भूयः पुनः (स्वयमपि कृतां) गमय। मूर्च्छनां विस्मरन्ती वा तवालोके निपततीति। स्वयं शब्दोऽव्ययः। किं कृत्वा। उत्सङ्गे क्रोडे वीणां निक्षिप्य। पुनः किं कृत्वा। नयनयोः सलिलैः अश्रुजलैरार्द्रास्ततः कथंचित्कृष्टा कष्टेनापि सा त्वयि त्वां सारयित्वा। किंभूते। मलिनं वस्त्रं यस्य तस्मिन्। किंभूता। गेयमुद्गातुकामा। गेयं गीतमुद्गातुं कामो यस्याः। काममनसोस्तुम इति मकारलोपः। किंभूतम्। विरचितं उपान्तं विरहोचितं पदं तिङाद्यन्तं यस्मिन्। पुनः किंभूतम्। मद्गोत्रं मम नाम अङ्कं चिह्नं यस्य। तथा चामरः। "मुखाग्रे क्रोड(प्रदेशे च) गोत्रं गात्रं च नाम्नि च।" मूर्च्छनां विस्मरन्तीति विस्मरणम्।

1. A चिन्तसीति

"स्वर: संमूर्च्छितो यत्र रागतां प्रतिपद्यते।
मूर्च्छनामिति तां प्राहु: कवयो ग्रामसम्भवामिति।" [भरत:] ।।८८।।

८९. **शेषान्मासान्गमनदिवसस्थापितस्यावधेर्वा**
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पै:।
मत्सयोगं हृदयगुणितारम्भमासादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदा:।।८९।।

शेषेति। हे सौम्य ! मम कान्ता गमनदिवसस्थापितस्यावधेर्मर्यादयावच्छिन्न-प्रकारतया प्रवासकालस्य। शेषान्मासान्। तान् मासान् प्रियस्य गमने इयन्तो मासा नेतव्या:। देहल्यां मुक्तैर्दत्तै: पुष्पैर्भुवि गणनया संख्यया विन्यस्यन्ती वा। तवालोके निपतिष्यति। प्रियस्य प्र(त्याग)म(नाय) पिण्डिकायां मङ्गलार्थं गृहिणीभिर्दिनेर्दिने पुष्पं दीयते। यदुक्तम् - "पतिप्रत्यागमार्थं सा दैवतं गृहमर्चयेदिति।" तथा हृदये बुद्धौ निहितो धृत आरम्भोऽनुष्ठानं यस्य। तं मम संयोगं आसादयन्ती वा भविष्यन्ती। अवश्यद्रष्टव्ये कारणत्वमाह। प्रायेणेति। रमणस्य प्रियतमस्य विरहेषु प्रायेण (बा)हुल्येन (स्त्रीणा)मत्रत्योक्ता अङ्गनानां विशिष्टाङ्गवतीनां विनोदा भवन्ति। विनुद्यन्ते प्रेर्यदिवसा एभिरिति विनोदव्यापारा:।।८९।।

९०. **सव्यापारामहनि न तथा पीडयेन्मद्वियोग:**
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशात्सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनासन्न-वातायनस्थ:।।९०।।

*A24b*सव्यापारामहनीति। हे मेघ ! मम वियोगो दिवसे व्यापारे विनोदै: सह वर्त्तमानां निशि निर्व्यापारां विनोदशून्याम्। अत एव गुरुतरा शुक्पीडा यस्या ईदृशीं ते तव सखीम्। अहनि दिवसे तथा पीडयेत्। यथा पीडयेदिति शङ्के उत्प्रेक्षे। अहनि (दि)वा न पीडयेत्। कुत: सव्यापारामिति हेतु:। तर्हि विशेषणं गतौ। निर्विनोदा। तव सखीं गुरुतरं शुचं शङ्के। सम्भावयामि। अतो निशीथे रात्रौ मत्सन्देशै: मम सन्देशै: निबद्धवाक्यैस्तां साध्वीं पतिव्रतां गुरुतरशुचश्च। उन्निद्रां मम कान्तामलमत्यर्थं सुखयितुं सुखिनीं कर्त्तुं यत्नं कुर्वितीत्यर्थ:। किंभूत:। अवनिर्भूमिरेव शयनं शय्या तत्र यदासन्नं सन्निकृष्टं वातायनं तत्र विद्यमान: सन् त्वं पश्येति सम्बन्ध:। यत्नेन पतिव्रताधर्माचरणा-न्यनुत्क्रान्तासेवित इति व्यज्यते। यदुक्तम् -

"ऋजुलज्जावती साध्वी सुशीला प्रियवादिनी।
अनुकूलप्रियात् ह्येषा बधूर्धीरैरुदाहृता"।।९०।।

९१. **आधिक्षामां विरहशयने सन्निकीर्णैकपार्श्वां**
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।
नीता रात्रिः क्षणमिव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहजनितैरस्त्रुभिर्यापयन्तीम्।।९१।।

चतुर्भिश्श्लोकैः कृपापात्रतां दर्शयति। आधीत्यादि। आधि नाम मनो व्यथया क्षामं कृशां तां पश्य। किंभूताम्। विरहस्य शयने भूमिशय्यायां संकीर्णो निक्षिप्तः सन् एवं पार्श्वं यस्याः सा। कमिव। प्राच्यीमूले पूर्वस्या दिशः आरम्भे भागे कलामात्रं शेषं यस्याः। तामीद्वशीमिन्दोश्चन्द्रस्य तनुं शरीरमिव। पुनः किंभूताम्। विरहेण जनितैः। अत एव उष्णैरश्रुभिस्तामेव रात्रीं यापयन्तीम्। प्रेरयन्तीं पश्येति सम्बन्धः। तामेवेति। कां या रात्रिर्मया सह इच्छारतैः पुरुषायितादिभिः। क्षणमिव मुहूर्त्तमिव उत्सङ्ग इव। (नी)ता तामित्यर्थः। निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इति। वचनात्क्षण इवेति। त्या(गशौर्यादिसत्त्वा)देः कालिदासवचनप्रामाण्याद्वा[1] नपुंसकत्वम्। कृष्णचतुर्द्दश्यां प्राचीमूले चन्द्रस्य एका कला न दृश्यते। प्रत्युग्रकर्णवचनात् कुतूहलात् तथानुरागादथ कान्तशासनात्। कान्तेति दृष्टा। पुरुषायिते यदा व(द)न्ति सन्तः पुरुषायितं तदेति।।९१।।

९२. **स्निग्धाः सख्यः क्षणमपि दिवा तां न मोक्ष्यन्ति बाला-**
मेकप्रेक्षा भवति हि जगत्यङ्गनानां प्रवृत्तिः।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः।।९२।।

(टीका नोपलभ्यते)

९३. **{निः}[2]श्वासेनाधरकिशलयक्लेशिना विक्षिपन्तीं**
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम्।
मत्संयोगः कथमपि भवेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम्।।९३।।

A25a{निः}[3]श्वासेनेत्यादि। पुनः किंभूते। {निः}[4]श्वासेन {निः}[5]श्व(सितेन) वा

1. A कालिदासवचनप्रामाण्यार्थाद्वा
2. A नि
3. A नि
4. A नि
5. A नि

(अल)कं विक्षिपन्तीम्। (चाल)यन्तीम्। किंभूतेन। अधरकिशलयमिव कोमलत्वात्पुनः पुनः किल्श्नातीति। तेन। किंभूतम्। शुद्धस्नानात्सुगन्धितैलादिरहितशुद्धस्नानात्परुषं रूक्षं यस्य। *A25b* (........worm eaten) ।।९३।।

९४. **आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा**
शापस्यान्ते विगलितशुचा या मयोद्वेष्टनीयाः।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण।।९४।।

[1](आद्येति। आद्ये विरहदिवसे दाम मालां) हित्वा त्यक्त्वा या शिखा बद्धा ग्रथि(ता शा)पस्यान्ते वि(गलि)तशुचा वीतशोके(न) मयोद्वेष्टनीयां (मोच)नीयां (स्प)र्शक्लि(ष्टाम्)। स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः। कठिना च सा विषमा निम्नोन्नता च तां कठिनविषमाम्। खञ्जनकुब्जा(दि)व(द)न्यतरस्य प्राधान्यविवक्षया विशेषणं विशेष्येण बहुलमित्यर्थः। एकवेणीमेकीभूतवेणीम्। तामित्यादि तत्पुरुषः। तथाभूतां तां शिखाम्। अयमिता अकर्तितोपान्ता न(खाः)।।९४।।

९५. **पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान्**
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्।।९५।।

(पा)दानिति। जालमार्गप्रविष्टान् गवाक्षविवरगतान् अमृतशिशिरान् इन्दोः पादान् रश्मीन् प्रति पूर्वप्रीत्या पूर्वस्नेहेन पूर्ववदानन्दकरा भविष्यन्तीत्याशयेन इत्यर्थः। अभिमुखं यथा तथा गतं तथैव सन्निवृत्तम्। यथागतं तथैव प्रतिनिवृत्तम्। तदा तेषामतिदुःसहत्वादिति भावः। चक्षुर्दृष्टिं तस्य खेदाद्यत्सलिलगुरुभिरश्रुभिर्दुर्भ(रैः प)क्ष्म(भि)श्छा(दय)न्तीम्। अत एव साभ्रेऽह्नीव दुर्दिनेन प्रबुद्धां मेघावरणात् अविकसितां न सु(प्ता)म्। अह(रि)त्यमुद्रिताम्। उभयत्रापि नञर्थस्य नशब्दस्य सुप्सुपेति स(मासः)। (स्थलक)मलिनीमिव स्थिताम्। एतेन विषयद्वे(षा)ख्या षष्ठीदशा सूचिता।।९५।।

९६. **सा संन्यस्ताभरणमबला पेशलं धारयन्ती**
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम्।

1. From this the commentary is most probably same as Mallinātha

त्वामप्यस्त्रं जललवमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा।।९६।।

A26a (सेति। अब)ला संन्यस्ता(भ)रणं कृशत्वात् परित्यक्ताभरणं असकृदनेकशः। दुःखदुःखेन दुःखप्रकारेण। प्रकारे गुणवचनस्येति द्विर्भावः। शय्योत्सङ्गे निहितं पेलवं मृदुलं गात्रं (धा)रितं (धा)रयन्ती वहन्ती। अनेनात्यन्तासक्त्या मूर्च्छावस्था सूच्यते। सा त्वत्सखी त्वामपि नवजलमयं नवाम्बुरूपमस्त्रं बाष्पमवश्यं सर्वथा मोचयिष्यति। द्विकर्मसु पचादीनामुपसंख्यानमिति मुचेः पचादित्वात् द्विकर्मकत्वम्। तथा हि। प्रायेणार्द्रान्तरात्मा। दुःखितं वीक्ष्य आकृष्यान्तःकरणो भवतीत्यर्थान्तरन्यासः। मेघस्तु द्रवान्तःशरीरः। अस्मिन्नवसरे त्वया शीघ्रं गन्तव्यजनितदशापरिहारायेति संदर्भाभिप्रायः। ननु किमिदमादिर्न। (चक्षुः)प्रीतिमुपेक्ष्या(वस्था)न्तराण्येव तत्रभवान् कविरादृतवानित्युच्यते।

"संभोगो विप्रलम्भश्च द्विधा शृङ्गार ईष्यते। पूर्वानुरागमानाख्यप्रवासकरुणात्मना।।
विप्रलम्भश्चतुर्धा च प्रवासस्तत्र च त्रिधा। कार्यतः संभ्रमाच्छापादस्मिन्काव्ये तु शापजः।।
प्राग्संगतयोर्यूनोः सति पूर्वानुरञ्जने। च(क्षुःप्री)त्याद(योऽवस्था दश स्यु)स्तत्क्रमो यथा।।"

पुनः किंभूतः।

"(दृङ्मनः)सङ्गसंकल्पा जागरः कृशताऽरतिः।
ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा (द)श।।"

पूर्वसंगतयोरेव प्रवास इति कारणा(त्)। न तत्रापूर्ववच्चक्षुःप्रीतिरुत्पत्तिमर्हति। हृत्संगस्य तु सिद्धस्याप्यविच्छेदोऽत्र वर्ण्यते। अन्यथा पूर्ववद्वाच्या इति तावत् व्यवस्थितेः। वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा। हृत्सङ्गादिरिहा(चष्ट क)विरष्टाविति स्थितिः। (मत्सादृश्यं लिखन्तीति पद्येऽस्मिन्प्रतिपा)दिता। चक्षुः(प्रीति)रिति प्रोक्तम्। निरुत्तरकृ(तान)नम्। चक्षुः(प्री)ति(र्भ)वेच्चित्रेष्वदृ(ष्ट)च(रदर्शना)त्। यथा मालविका(रूपमग्निमित्रस्य) पश्यतः। प्रोषितानां च भर्तॄणां क्व दृष्टादृष्टपूर्व(ता)। अथ तत्रापि सन्देहः स्वकलत्राणि पृच्छतु। किं भर्तुः प्रत्यभिज्ञा स्यात् किं वैदेशिकभावना। प्रवासादागते स्वस्मिन्नित्यलं बहुभिः।।९६।।

९७. **जाने सख्यास्तव मयि मनः संभृतस्नेहम-**
स्मादित्थंभूता प्रथमविरहे तामहं तर्कयामि।

वाचालं मां न खलु सुभगं मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिरात्भ्रातरुक्तं मया यत्।।९७।।

नन्वीदृशीं दशामापन्नेति क(थं त्व)या नि(श्चितमत आह। जाने इति। हे मेघ ! तव सख्या मनो मयि) संभृतस्नेहं संचितानु(रागं जा)ने। (अ)स्मात्स्नेहज्ञानकारणात्प्रथमविरहे। प्रथमग्र(हणं) दुःखातिशयद्योतनार्थम्। तां पूर्वोक्तावस्थामापन्नां त(र्क)यामि। ननु सुभगमानिनामेष स्वभावो यदात्मनि (स्त्री)णामनुरागप्रकटनं तत्राह। वाचालमिति। सुभगमात्मानं मन्यत इति। सुभगं मन्यः। आत्ममाने (खश्च) इति खशप्रत्ययः। *A26b*अरुर्द्विषद-इत्यादिना मुमागमः। तस्य (भा)वः सु(भगम्मन्य)भा(वः)। सुभगमानित्वं मां वाचालं बहुभाषिणं न क(रोति) खलु। (सौन्दर्याभिमानितां न) प्रकटयामीत्यर्थः। "(स्याज्जल्पाक)स्तु वा(चालो) वाचाटो बहुगर्ह्यवाक्" इत्यमरः। आलजाटचौ बहुभाषिणि इत्यालच्प्रत्ययः। किन्तु हे भ्रा{त!}[1] मयोक्तं यत् आधिक्षामामित्यादि तत्सर्वमचिरात् शीघ्रमेव ते तव प्रत्य(क्षम्)।।९७।।

९८. **रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं**
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाकुलकुवलय श्रीतुलामेष्यतीति।।९८।।

रु(द्धे)ति। अलकै(रु)द्धोऽपाङ्गयोः प्रसरा य(स्य) तत्तथोक्तम्। अञ्जनेन (स्नेहः) स्नैग्ध्यं तैलश्च (तेन) शून्यम्। किं च मधुनो मद्यस्य प्रत्या(दे)शात्प्रतिशेधात् वि(स्मृतो भ्रू)विलासो येन तत् तथोक्तम्। त्वय्यासन्ने सति स्वकुशलवार्त्ताशंसिनीति शेषः। उपर्यूद्धर्वभागे स्पन्दते स्फुरतीति उपरिस्पन्दि। तथा च निमित्तनिदाने -

"स्पन्दान्मूर्ध्नि छत्रलाभः भाले पट्टं शुभं भ्रुवि।
इष्टप्राप्तिं दृशोरूर्ध्वमपाङ्गे हानिमादिशेत्"।। इति।

मृगाक्ष्याः नयनम्। वाममिति शेषः। (xxxxxxx) तत्तथोक्तम्। प(दं) शब्दे च वाक्ये च इति (विश्वः। श्यामास्व)ङ्गमित्यादिकं मत् व्यवधानेन (स एव) ब्रूतेत्यर्थः। (तथा चोक्तं गुणपता)काया(म्)-

"वियोगे योगे वा प्रियजनसदृशानुभवनं ततश्चित्रं (क)र्म (स्वपन)विषये दर्शनमपि।
तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतिकारः कामव्यथितमनसां कोऽपि गदितः।।"

1. **A** तः

इति तत्र सदृशवस्तुवर्णनमाह। श्यामास्विति। श्यामासु प्रियङ्गुलतासु। श्यामा तु महिलाश्रद्धया। "लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली"त्यमरः। अङ्गं शरीरमुत्पश्यामि। वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः। दाने देवादिपूजायां स्प(न्देऽ)लंकरणेऽपि च।। इति स्त्रीणां वामभागप्राशस्त्यात् मीन) क्षो(भान्मीनच) लना(च्च)लस्य कुवलयस्य (श्रियाः) शोभायास्तुलां सादृश्यमेष्यतीति शङ्के इति तर्कयामि। तुल्या(र्थैरतु)ल्योपमाभ्यामित्यत्र सदृशपर्यायस्यैव। तुलाशब्दस्य प्रतिषेधवाचित्वात् तत्र सादृश्यवाचित्वात् च योगेऽपि तृतीया (इति)।।९८।।

९९. **वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-**
र्मुक्ताजालं चिरविरचितं त्याजितो दैवगत्या।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः कनककदलीस्तम्भगौरश्चलत्वम्।।९९।।

वामश्चेति। मदीयैः कररूहपदैः। "पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियामि"त्यमरः। मुच्यमानः परिहीयमाणः। नखाङ्करहित इत्यर्थः। ऊरो नखपदास्पदत्वं तु रतिरहस्ये -

"कण्ठ(कक्षकुचपार्श्व)भूजोरःश्रोणिसक्थिषु नखास्पदमाहुः इति।"

(चिरविर)चितं चिराभ्यस्तं (मुक्ताजालं) मौ(क्तिकस)रमयं कटिभूषणम्। दैवग(त्या) दैववशेन त्याजितः। संप्रति न(खपदो)ष्माभावेन शीतोपचारस्य यस्य तस्य वैयर्थ्यादिति भावः। त्यजते(र्ण्य)न्तात् कर्मणि क्तः। द्विक(र्मसु) पचादीनामुपसंख्यानमिति द्विकर्मत्वम्। सम्भोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानाम्। "संवाहनं मर्दनं स्यादि"त्यमरः। समुचितः परितः (रसार्द्रो न) शुष्कश्च विवक्षितः। तत्रैव प्राप्तिसम्भवात्सरसकदलिस्तम्भश्च स इति स्थितः। गौरः (पाण्डु)रः। "गौरः (शरी)रे सिद्धार्थे शुक्ले पीतेऽ(रुणेऽपि)" मालतीमालायाम्। अस्याः प्रियायाः (वा)म ऊरुश्चलत्वं स्पन्दनं यास्यति प्राप्स्यति। "ऊरोः स्पन्दाद्रतिं (विद्या)दूर्वोः प्राप्तिं सुवाससः" इति (निमित्तनिदाने)।।९९।।

१००. **तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्यात्**
तत्रासीनः स्तनितविमुखः याममात्रं सहेथाः।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचित्
सद्यः कण्ठच्युतभुजलता-ग्रन्थि गाढोपगूढम्।।१००।।

A27a (तस्मिन्निति। हे जलद !) त्वदुपसर्पणका(ले) सा मत्

प्रियालब्धनिद्रासुखं यया सा लब्धनिद्रासुखा चेत् यदि स्यात्। तत् एनां निद्राणां प्रियामन्वास्य। पश्चादासित्वेत्यर्थः। उपसर्गवशात्सकर्मकत्वम्। स्तनितविमुखो गर्जित(पराङ्)मुखो निःशब्दः सन्नित्यर्थः। अन्यथा निद्राभ(ङ्गस्या)दित्यर्थः। याममात्रं प्रहरमात्रम्। "द्वौ याम(प्रहरौ समौ) इत्य"मरः। सहस्व (प्र)ती(क्षस्व)। प्रार्थनायां लोट्। शक्तयोरेकवारसुरतस्य (यामावधि)कत्वात्। स्वप्नेऽ(पि) तथा भवितव्यमित्यभि(प्रा)यः। तथा च रतिसर्वस्वे - "एकवारावधिर्या(मो) रतस्य परमो मतः। चण्डशक्तिम(तो) यूनोरद्भुतक्रमवर्त्तिनोः"।। इति।

याममात्रस्य (प्रयोज)नमाह। मा भूदिति। अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथञ्चित्कृच्छ्रेण स्वप्नलब्धे सति गाढोपगूढं गाढालिङ्ग(नम्)। न(पुंसके) भावे क्तः। सद्यस्तत्क्षणं मे कण्ठाच्च्युतः स्रस्तो भुजलतयोर्ग्रन्थिर्बन्धो यस्य तत्तथोक्तम्। (मा) भूत् मास्तु। कथञ्चिल्लब्धस्यालिङ्गनस्य सद्यो विघातो मा भूदित्यर्थः। नात्र। तामुन्निद्रामिति पूर्वोक्तेन निद्राच्छेदेन विरुध्यते। पुनः सप्तम्या(द्यवस्था)सु पाक्षिकनिद्रासम्भवात्। तथा च रसरत्नाकरे -

"आसक्ती रोदनं निद्रा निर्लज्जानर्थवाग्भ्रमः।
सप्तमादिषु जायन्ते दशाभेदेषु वासुके।" इति।।१००।।

१०१. **तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन**
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्।
विद्युत्कम्पस्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः।।१०१।।

तामिति। तां प्रियां सजलकणिकाभिर्जलबिन्दुभिः शीतलेनानिलेनोत्थाप्य प्रबोध्य। एतेनास्याः प्रभुत्वाद्व्यजनानिलसमाधिर्व्यज्यते। यदाह भोजराजः -

"मृदुभिर्मर्दिरैः पादे शीतलैर्व्यजनैः स्तनौ। श्रुतौ च मधुरैर्गीतैर्निद्रातो बोधयेत्प्रभुम्।।"

(इ)ति। अभिनवैर्नूतनै(र्मालतीनां जालकैः समं जातीमुकुलैः) सह। (सुम)ना माल(ती) जातिः। साकं सार्द्धं समं सह। "क्षारको (जाल)कं क्लीबे कलिका को(रकः पुमा)निति" चामरः। ×××××ः "कुट्मलो मुकुलोऽस्त्रि(याम्)[१]" इति अमरः। प्रत्याश्वस्तां शिशिरानलसम्पर्कात् पुनरुज्जीविताम्। श्वसेः कर्त्तरि क्तः। आदितश्चेति चकारादिट्प्रतिषेधः। एतेनास्याः कुसुमसौकुमार्यं गम्यते। "त्वत्सनाथे त्वत्सहिते। स(नाथं)

1. A य

प्र(भुमित्या)हुः (सहिते चि)त्तता(पिनीह्लति शब्दा)र्णवे। गवाक्षे स्तिमितनयने यस्याः ताम्। (कोऽसाविति) विस्म(यान्निश्च)लनेत्रां मानिनीमनौचित्यासहि(ष्णु)मित्य(र्थः)। विद्युत्गर्भोऽ(न्तःस्थो यस्य स विद्युद्गर्भः। अन्तर्लीनविद्युत्क इत्यर्थः। "(गर्भोऽपवारके)ऽ{न्तः}[1]स्थे कुक्षिस्था" इति शब्दार्णवः। दृष्टिप्रति(घातेन वक्तुर्मुखा)वलोकनप्रतिबन्धकत्वान्न (विद्यु)ता द्योतितव्यमिति भावः। (धीरो धैर्यविशिष्टश्च) सन्। (अन्यथा) शालिनत(वादि)त्वेना(श्वास)नप्र(सङ्गा)दिति भावः। स्तनितव(चनैर्व)क्तुं प्रक्रमेथा उपक्रमस्व। विध्यर्थे लिङ्। प्रोपाभ्याम् इत्यात्मनेपदम्।।१०१।।

१०२. **भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं**
तत्संदेशान्मनसि निहितादागतं त्वत्समीपम्।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि।।१०२।।

A27b(संप्रति दूतस्य श्रोतृजनाभिमुखीक)रणचातु(रीमुपदिशति।) भर्त्तुरिति। (विध)वा ग(त)भर्त्तुका न भवति। अनेन (भर्त्तुजीवनसूचनाद)निष्टा(गम)शङ्कां वारयति। (मां) भर्त्तुस्तव (पत्युः) प्रियमित्रं प्रिय(सुहृदम्)। (xxxxxxxxxxxx)(स्थापि)तैः। तत्संदेशैस्तस्य भर्त्तुः सन्देशैस्त्वत्समीपमागत(म्)। भर्त्तुः सन्देशकथनार्थमाग(त) मित्यर्थः। मामम्बुवा(हं मेघं) विद्धि जानी(हि)। न केवलमहं वार्त्ताहारः। किंभूताः। कोऽपीत्याशयेत्यर्थः। योऽम्बुवाहः। अबलानां स्त्रीणां[2] वेणयस्तासां मोक्षे मोचने उत्सुकानि पथि श्राम्यतां खिद्यमानानां प्रोषितानां प्रवासिनामित्यर्थः। वृन्दानि मन्द्रस्निग्धैः ध्वनिभिः त्वरयति। पान्थोपकारिणो मे किमु वक्तव्यम्। सुहृदुपकारित्वमिति भावः।।१०२।।

१०३. **इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा**
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम्।
श्रोष्यत्यस्मात्परमवहिता सौम्य ! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः संगमात्किञ्चिदूनः।।१०३।।

(इतीति।) .... सा मत् प्रिया। (उन्मुख्युत्क)ण्ठ्यौत्सू(क्येनोच्छ्वसित)हृ(द)या विकसितचित्ता सती त्वां वीक्ष्य। संभाव्य सत्कृत्य च।

---

1. A न्त
2. A स्वस्त्रीणां

अ(स्माद्)भर्तृमैत्रीज्ञापनात्परं सर्वं श्रोतव्यम्। अवहिता अप्रमत्ता सती श्रोष्यत्येव। अत्र सीता हनु(म)दुपमानादस्याः पातिव्रत्यं मेघस्य विस्त्रियां दूतगुणसम्पत्तिश्च व्यज्यते। तदुक्तं रत्नाकरे -

"ब्रह्मचारी बली धीरो मा(या)वी मा(नवर्जितः)।
धीमानु(दा)रो निःशङ्को वक्ता दूतः स्त्रियां भ(वेत्)।।"

इति। ननु वार्त्तामात्रश्रवणादस्याः को लाभ इत्याशंक्यार्थान्तरमाह। हे सौम्य ! साधो। सीमन्तिनीनां वधूनाम्। "नारी सीमन्तिनी वधूरि"त्यमरः। सुहृदा सुहृन्मुखेनोपगतः प्राप्तः। सुहृ(त्पदं वि)प्रलम्भशङ्कानिवारणार्थम्। कान्तस्योदन्तो वार्त्ता। "वार्त्ता प्रवृत्तिर्वृत्तान्तः उदन्तः स्यादि"त्यमरः। संगमात्कान्तसंपर्कात् किंचिदूनः। के देवानन्दकारीत्यर्थः।।।१०३।।

१०४. **तामायुष्मन्मम च वचनादात्मनश्चोपकर्त्तुं**
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः।
अव्यापन्नः कुशलमबले! पृच्छति त्वां वियुक्तां
भूतानां हि क्षयिषु करणेष्वाद्यमाश्वास्यमेतत्।।१०४।।

A28a (सम्प्र)ति संदिशति तामिति। हे आयुष्मन् ! प्र(शंसायां) मतुप्। प(रोपकारश्लाघ्य)जीवितेत्यर्थः। मम वचनं प्रार्थनावचनं तस्माच्चात्मनः स्वस्योपकर्त्तुम्। परोपकारे। आत्मानं कृता(र्थ)यितुमित्यर्थः। उपकारक्रियां प्रति कर्मत्वेऽपि तस्योपकरोतीत्यादिवत् सम्बन्धमात्रविवक्षायामात्मन इति षष्ठी न विरुध्यते। यथाह भारविः -

"सा लक्ष्मीरुपकुरुते यथा परेषाम्।"

तथा च श्रीहर्षः -

"साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम्।
न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम्।।"

इति। तथा च- "क्वचित् द्वितीयादर्शनात्सर्वत्र न तथा।" इति नाथवचनमनाथवचनम्। तां मत् प्रियां ब्रूयाः। हे अबले ! तव सहचरो भर्त्ता रामगिरेश्चित्रकूटस्याश्रमेषु तिष्ठतीति रामगिर्याश्रमस्थः सन्। अव्यापन्नो (न) मृतः। वियुक्तो वियोग प्राप्तो एवंभूतः सन् त्वां कुशलं पृच्छतीति। दुह्यादित्वात्पृच्छतेर्द्विकर्मकत्वम्। सुलभविपदाम्।

अयत्नसिद्धविप(त्तीनां) प्राणीनामेतदेव प्रथममवश्यं प्रष्टव्यम्। "कृत्याश्चे"त्यावश्यकार्थे ण्यत्प्रत्ययः।।१०४।।

१०५. **अङ्गेनाङ्गं सुतनु तनुना गाढतप्तेन तप्तं**
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन।
दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः।।१०५।।

अङ्गेनेति। (किं च।) दूरवर्त्ती दूरस्थः। (न चा)गन्तुं शक्यत इत्यर्थः। वै(रिणा वि)रोधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स तव स(ह)चरः। तनुना कृशेन गाढतप्तेनात्यन्तसन्तप्तेन सा(स्रे)ण साश्रुणा। उत्कण्ठा वेदनाऽस्य जाता स तेनोत्कण्ठितेन। (त)दस्य संजातम्। (इत्यादिने)तच् प्रत्ययः। उ(त्क)ण्ठतेर्वा कर्त्तरि क्तः। समधिकतर-मुच्छ्वसितीति समधिकतरोच्छ्वासिना। दीर्घोच्छ्वासेनेत्यर्थः। (ता)च्छी(ल्ये) णिनिः। (अङ्गेन स्वशरीरेण प्र)तनु कृशा। तप्तं संतप्तम्। अस्रद्रुतम्। अश्रुक्लिन्नम्। "अश्रु (नेत्राम्बु) रोदनं चास्रमस्रु चेत्य"मरः। अ(विरतोत्कण्ठम-विच्छिन्नवेदनमुष्णो)च्छ्वासं तीव्रनिःश्वासम्। "तीक्ष्णं खरं तीव्रं चण्डमुष्णं पटु स्मृतम्।" इति हलायुधः। त्वदीयैस्तै स्वसंवेद्यैः संकल्पैः। मनोरथैः मनोव्यापारैर्विशति। किं भवतीत्यर्थः। अत्र समानुरागित्वद्योतनाय नायकेन नायिकायाः समानावस्थात्वमुक्तम्।।१०५।।

१०६. **शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-**
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्य
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह।।१०६।।

*A28b*इदानीं (स्वावस्थानि)वेद(ना)य प्र(स्तौति। श)ब्दाख्येयमिति। यस्ते प्रियः सखीनां पुरस्तादग्रे (आन)नस्पर्शे त्वन्मुखसंपर्के लोभात् गार्ध्या(त्। अधरपानलोभादित्यर्थः। शब्दाख्येयं शब्देन रवेणाख्येयमु)च्चैर्वा(च्यमपि यत्तत्। वचनमपी)ति (शेषः। कर्णे) कथयितुं लोलो लालसोऽभूत्किल। "(लो)लुपो लोलुभो लोलो लालसो लम्पटोऽपि" चेति यादवः। श्रवण(विषयं कर्णपथम)तिक्रान्तः तथा लोचनाभ्यामदृश्यः। अतिदूरस्थत्वात् द्रष्टुं श्रोतुं वा न श(क्यः) इत्यर्थः। स तव प्रियः। (त्वा)मुत्कण्ठया विरचितानि (पदानि सुप्तिङन्तशब्दा वाक्यानि वा यस्य तत्तथोक्तम्। "प(दं) शब्दे च वाक्ये च" इति विश्वः। (श्यामास्व)ङ्गमित्यादिकं मन्मुखेनाह मत् व्यवधानेन (स एव) ब्रूत इत्यर्थः।।१०६।।

१०७. **श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातान्**
गण्डच्छायं शशिनी शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्थं क्वचिदपि न ते चण्डि साद्दृश्यमस्ति।।१०७।।

(उक्तं गुणपता)कायाम् -

"वियोगे योगे वा प्रियजनसदृशानुभवनं। ततश्चित्रं (क)र्म (स्वपन)विषये दर्शनमपि।
तदङ्गस्पृष्टानामुपनतवतां स्पर्शनमपि। प्रतिकार: कामव्यथितमनसां कोऽपि गदित:।।"

इति तत्र सदृशवस्तुवर्णनमाह। श्यामास्विति। श्यामासु प्रियङ्गुलतासु। श्यामा तु महिलाश्रद्धया। "(लता गोवन्दनी गुन्दा) प्रियङ्गु: फलिनी फली"त्यमर:। अङ्गं शरी(रमुत्पश्यामि। सौकुमा)र्यादिसाम्यादङ्गमिति तर्कयामीत्यर्थ:। चकितहरिणीप्रेक्षणे दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां बर्हिणां (बर्हभा)रेषु। केशपाशान् प्रतनुषु (स्वल्पासु न)दीवीचिषु। (अ)त्र न(दीवी)चीनां विशेषणोपादाने-नानुक्तग्रहणदोष:। (भ्रू)साम्य(नि)र्वाहाय महत्त्वदोष(नि)वारणार्थत्वात्तस्य। तदुक्तम् (रसरत्ना)करे-

"ध्वन्युत्पादे गुणोत्कर्षे भोगोक्तौ दो(षवारणे)।
विशेषणाद्विशेष्यस्य नास्त्यनुक्त(गु)णग्र(ह)।।"

च इति गुणस्य विशेषणम्। भ्रूविकारान्। भ्रू(प)ताकामित्यादिभि उपमितसमास:। उत्पश्यामीति सर्वत्र सम्बध्यते। (तथापि ना)स्ति मनो(निर्वृतिरित्याशये)नाह। हन्तेति। (हन्त वि)षादे। "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयो:" इत्यमर:। हे चण्डि ! हे को(प)ने ! "(चण्ड)स्त्वत्यन्तकोपन:" इत्यमर:। गौरादित्वात् ङिष्। उपमान(कथन)मात्रेण (न) कोपितव्यमितिभा(व:। क्वचिदपि) कस्मिन्नप्येकस्मिन्वस्तुनि ते तव सादृश्यं नास्ति। अतो न निवृ(णो)मीति तात्पर्यार्थ:। एतेनास्या: सौन्दर्यम(नुपम)मिति (व्यज्यते)।।१०७।।

१०८. **धारासिक्तस्थलसुरभितस्त्वन्मुखस्यास्य बाले**
दूरीभूतं प्रतनुमपि मां पञ्चवाण: क्षिणोति।
घर्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि।।१०८।।

(टीका नोपलभ्यते)

१०९. त्वामालिख्य प्रणयकुपितां धातुरागैश्शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अश्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः।।१०९।।

"(नृशंसो धातु)कः क्रूरे इत्य"मरः। कृतान्तो दैवम्। "कृ(तान्तो यमसिद्धान्तदैवा-कुशल) कर्मसु इत्य"मरः। तस्मिन्नपि चित्रेऽपि। नौ आवयोः। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वानावौ (इति नावादेशः)। संगमं सह(वासं) न सहते। संगमलेखनमपि न सहत इति। किमु वक्तव्यमिति शब्दार्थः। सं(प्रति प्रकृ)तिदर्शनमाह। त्वामिति। हे प्रिये ! प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्था(युक्ताम्)। त्वां त्वत्प्रतिकृतिमित्यर्थः। धातवो गैरिकादयः। "धातुर्वातादि(शब्दादिगैरिकादि)ष्वजादिषु" इति यादवः। अत एव रागाः रञ्जकद्रव्याणि। चित्रादि रञ्जने द्रव्ये ला(क्षा)दौ प्रणयेच्छयोः। "{सा}[1]रङ्गादौ च रागः स्यादारुण्ये रञ्जने (पु)मान्" इति (शब्दार्णवे। शिलायां शिलापट्टे) आलिख्य नि(र्मायात्मानं) माम्। (मत्प्रतिकृ)तिमित्यर्थः। ते तव। (चित्र)गता(याः) इत्यर्थः। (च)रणपति(तं) कर्त्तुं तथा लेखितुं (यावदि)च्छामीति तावदिच्छा(सम)का(लमेव मुहुरुपचितैः) प्रवृद्धैरस्रैरश्रुभिः। "अस्र(मश्रुणि शोणिते)" इति विश्वः। (मे) दृष्टिरालुप्यते। (आ)व्रियते। अतो दृष्टिप्रतिब(न्धनाल्ले)खनं प्रतिबध्यत इति (भावः)। किं बहुना क्रूरो धातुकः।।१०९।।

(*A29b*)No commentary available from this verse)

११०. मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिलयेष्वश्रुलेशाः पतन्ति।।११०।।

१११. भित्त्वा सद्यः किशलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति।।१११।।

A30a११२. संक्षिप्येत क्षणमिव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।

---

1. A शा

इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः।।११२।।

११३. नन्वात्मानः बहु विगणयन्नात्मना नावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपगतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।११३।।

११४. शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानेतान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु।।११४।।

११५. भूयश्चापि त्वमसि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सत्वरं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टस्स्वप्ने कितव रमयन्कामपि त्वं मयेति।।११५।।

११६. एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहव्यापदस्ते ह्यभोगा-
दृष्टे वस्तुन्युपचितरसाः प्रेमराशी भवन्ति।।११६।।

११७. कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव।।११७।।

११८. एतत्कृत्वा प्रियसमुचितं प्रार्थनं चेतसो मे
सौहार्द्राद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान्देशान् विचर जलद प्रावृषा सम्भृतश्रीर्मा
भूदेवं क्वचिदपि च ते विद्युता विप्रयोगः।।११८।।

इति श्रीकालिदासविरचितं मेघदूताख्यं खण्डकाव्यं समाप्तम्।।

श्रीलड्डुकेशशरणम्।

"परिवेति परिवेत्ता च या च परिविद्यते।
ते सर्वे (xx)कं यान्ति वा (xx)चलपञ्चमः।।"

Index of Verses

श्लोक-संख्या:	श्लोका:	अनुपलब्धा: टीका:
१	कश्चित्कान्ताविरहगुरुणा.	
२	तस्मिन्नद्रौ कतिचिदबला.	
३	तस्य स्थित्वा कथमपि .	
४	प्रत्यासन्ने नभसि दयिता.	
५	धूमज्योतिः सलिलमरुतां.	
६	जातं वंशे भुवनविदिते.	
७	संतप्तानां त्वमसि.	
८	त्वामारुढं पवनपदवी.	
९	मन्दं मन्दं नुदति.	
१०	तां चावश्यं दिवस.	
११	कर्तुं यच्च प्रभवति.	
१२	आपृच्छस्व प्रियसख.	
१३	मार्गं तावच्छृणु.	
१४	अद्रेः शृङ्गं हरति.	
१५	रत्नछायाव्यतिकर.	
१६	त्वय्यायत्तं कृषिफल.	
१७	त्वामासारप्रशमित.	
१८	अध्वक्लान्तं प्रतिमुखगतं.	
१९	छन्नोपान्तः परिणत.	
२०	स्थित्वा तस्मिन् वनचर.	

श्लोक-संख्या:	श्लोका:	अनुपलब्धा: टीका:
२१	तस्यास्तिक्तैर्वन.	
२२	नीपं दृष्ट्वा हरीत.	
२३	अम्भोबिन्दुग्रहणचतुरां.	
२४	उत्पश्यामि द्रुतमपि.	
२५	पाण्डुछायोपवनवृत्तय:.	
२६	तेषां दिक्षु प्रथित.	
२७	नीचैराख्यं गिरिमधि.	
२८	विश्रान्त: सन् व्रज.	
२९	वक्र: पन्था यदपि.	
३०	वीचिक्षोभस्तनित.	
३१	वेणीभूतप्रतनु सलिलाऽ.	
३२	प्राप्यावन्तीनुदयन.	
३३	दीर्घीकुर्वन् पटु.	
३४	हारांस्तारां.	टीका नोपलभ्यते
३५	जालोद्गीर्णैरुपचित.	
३६	भर्त्तु: कण्ठच्छविरिति.	
३७	अप्यन्यस्मिन्.	
३८	पादन्यासक्वणितरशना.	
३९	पश्चादुच्चैर्भुजतरुवनं.	
४०	गच्छन्तीनां रमणवसतिं.	
४१	तां कस्यांचिद्भवन.	
४२	तस्मिन्काले.	
४३	गम्भीराया: पयसि.	
४४	तस्या: किञ्चित् करधृत.	
४५	त्वन्निष्यन्दोच्छ्वसित.	
४६	तत्र स्कन्दं नियत.	

श्लोक-संख्या:	श्लोका:	अनुपलब्धा: टीका:
४७	ज्योतिर्लेखावलयि.	
४८	आराध्यैनं शरवणभवं.	
४९	त्वय्यादातुं जलमवनत.	
५०	तामुत्तीर्य व्रज परि.	
५१	ब्रह्मावर्त्तं जनपद.	
५२	हित्वा हालामभिमत.	
५३	तस्माद् गच्छेरनु.	
५४	तस्या: पातुं सुरगज.	
५५	आसीनानां सुरभित.	
५६	तं चेद्वायौ सरति.	
५७	ये त्वामुक्तध्वनिमसहना	
५८	तत्र व्यक्तं दृषदि.	
५९	शब्दायन्ते मधुरमनिलै:	
६०	प्रालेयाद्रेरुपतटमति.	
६१	गत्वा चोर्ध्वं दशमुख.	
६२	उत्पश्यामि त्वयि.	
६३	तस्मिन् हित्वा.	
६४	तत्रावश्यं वलय.	
६५	हेमाम्भोजप्रसवि.	
६६	तस्योत्सङ्गे प्रणयिन.	
६७	विद्युत्वन्तं ललित.	
६८	हस्ते लीलाकमल.	
६९	यस्यां यक्षा: सितमणि.	
७०	गत्युत्कम्पादलकपतितै.	
७१	आनन्दोऽत्थं नयनसलिलं	टीका नोपलभ्यते
७२	नीवीबन्धोच्छ्वसित.	

श्लोक-संख्या:	श्लोका:	अनुपलब्धा: टीका:
७३	मन्दाकिन्या: सलिल.	
७४	नेत्रा नीता: सतत.	
७५	यत्र स्त्रीणां प्रियतम.	
७६	मत्वा देवं धनपति.	
७७	तत्रागारं धनपति.	
७८	वापी चास्मिन्	
७९	यस्यास्तीरे रचित.	
८०	रक्ताशोकश्चल.	
८१	तन्मध्ये च स्फटिक.	
८२	एभि: साधो!.	
८३	गत्वा सद्य:.	
८४	तन्वी श्यामा.	
८५	तां जानीया: परिमितकथा:.	
८६	नूनं तस्या:.	
८७	आलोके ते निपतति.	
८८	उत्सङ्गे वा मलिन..	
८९	शेषान् मासान्.	
९०	सव्यापारामहनि न.	
९१	आधिक्षामां विरह.	
९२	स्निग्धा: सख्य: कथमपि	टीका नोपलभ्यते
९३	नि:श्वासेनाधरकिसलय.	
९४	आद्ये बद्धा विरहदिवसे	
९५	पादानिन्दोरमृत.	
९६	सा संन्यस्ताभरण.	
९७	जाने सख्यास्तव.	
९८	रुद्धापाङ्गप्रसरमलकै.	

श्लोक-संख्या:	श्लोका:	अनुपलब्धा: टीका:
९९	वामश्चास्या: कर.	
१००	तस्मिन्काले जलद.	
१०१	तामुत्थाप्य स्वजल.	
१०२	भर्त्तुर्मित्रं प्रियमविधवे.	
१०३	इत्याख्याते पवनतनयं.	
१०४	तामायुष्मन्मम च.	
१०५	अङ्गेनाङ्गं प्रतनु.	
१०६	शब्दाख्येयं यदपि.	
१०७	श्यामास्वङ्गं चकितहरिणी.	
१०८	धारासिक्तस्थलसुरभि.	टीका नोपलभ्यते
१०९	त्वामालिख्य प्रणय.	
११०	मामाकाशप्रणिहित.	टीका नोपलभ्यते
१११	भित्त्वा सद्य: किसलयपुटान्देव.	टीका नोपलभ्यते
११२	संक्षिप्येत क्षणमिव.	टीका नोपलभ्यते
११३	नन्वात्मानं बहु.	टीका नोपलभ्यते
११४	शापान्तो मे भूजग.	टीका नोपलभ्यते
११५	भूयश्चापि त्वमसि	टीका नोपलभ्यते
११६	एतस्मान्मां कुशलि.	टीका नोपलभ्यते
११७	कच्चित्सौम्य!	टीका नोपलभ्यते
११८	एतत्कृत्वा प्रिय.	टीका नोपलभ्यते

Bibiliography

(A) PRIMARY SOURCES

Abhijnana-Sakuntalam of Kalidasa, with Raghavabhatta's comm. ed. by M.R.Kale, Delhi: Motilal Banarsidass, 1965

AitareyaBrahmana with Sayana's Comm., by Kasinatha Sastri, Poona: Anandasrama Press, 1979

Alamkarasarvasva of Ruyyaka, ed. by R.P. Dvivedi, Delhi: Chowkhamba Sanskrit Series 1971

Alamkarakaustubha of Kavikarnapura, ed. by R.S. Nagar, Delhi: Parimal Publication, 1981

Alamkararatnakara of Sobhakara, ed. by C.R. Devadhar, Poona: Oriental Book Agency, 1942

Alamkarasekhara of Kesavamisra, ed. by Anantarama Sastri, Varanasi: Chowkhamba Sanskrit Series, 1927

Alamkaravimarsini of Jayaratha, ed. by Girijaprasad Dvivedi, Bombay: NSP, 1937

Amarusataka of Amaru, ed. by Prasun Basu, Calcutta, Navapatra Prakasan, 1972

Arthasastra of Kautilya, ed. by Rajanikanta Deva Sarma, Guwahati: Asom Prakasan Parisad, 2002

Arthasastra of Kautilya, ed. By R.P .Kangle Mumbai 1996

Arthasastra of Kautilya, ed. By Shamasastri Mysore Oriental Library Mysore 1924.

Astadhyayi of Panini, ed. by S.C. Vasu, Delhi: Motilal Banarsidass [MLBD], 1962

Atharvaveda, ed. by Nag Sharan Sing, Delhi: Nag Publishers, 1987

Abhinaya-Darpana of Nandikesvara, ed. by M.M. Ghosh, Calcutta: Farma K.L. Mukhopadhaya, 1957

Balaramayana of Rajasekhara, ed. by Dr. Ganga Sagar Roy, Varanasi: Chowkhamba Surabharati Prakasan, 1984

Chandomanjari of Gangadas, ed. by Dileep Kumar Kunjilal, Calcutta: Modern Book Agency Pvt. Ltd., 1962

Dasarupaka of Dhananjaya, ed. by Dr.Vaijanath Pandeya, Varanasi: Motilal Banarsidass (MLBD) 1976.

Dhvanyaloka of Anandavardhana, with Locana Comm. of Abhinavagupta, ed. by Ram Sagar Tripathi, Delhi: Motilal Banarsidass (MLBD) 1963

Harsacharita of Banabhatta, ed. by P.V. Kane, Delhi: Motilal Banarsidass [MLBD), 1986

Hitopadesha of Narayana Pandita London Longman 1926

Isopanisad, with Sankara Comm. ed. by Sitanath Goswami, Calcutta: Sanskrit Pustak Bhandar, 1370 B.S.

KamandakiyaNitisara 3 volumes Anandashrama Poona 2001 Edn.

Kamandakiya Nitisaraed By T.Ganapathisastri Trivandraum Sanskrit Sereies Trivandrum 1912

Kathasaritsagara of Somadeva, ed. by C.H. Tawney, Delhi: Motilal Banarsidass (MLBD), 1968

Kavyalankara of Bhamaha, ed. by Baladeva Upadhyaya, Varanasi: Chowkhamba Sanskrit Series, 1981

Kavyalamkarasutravrtti of Vamana, ed. by Bechan]ha, Varanasi: Chowkhamba Sanskrit Series, 1976

Kavyadarsa of Dandin, ed. by Ramachandra Misra, Varanasi: Chowkhamba Sanskrit Series, 1958

Kavyaprakasa of Mammata Bhatta, ed. by Bhimsena Diksit, Varanasi: Chowkhamba Sanskrit Series, 1927

Mahabharatha of Vyasa Poona, BORI 1964

Malatimadhava of Bhavabhuti, with Jagadhara's Comm. ed. by R.D. Karmakar, Delhi: Chowkhamba Sanskrit Pratishthan, 2003

Malatimadhava of Bhavabhuti, with Rasamanjari Comm. ed. by Mahadeva Sastri, Thiruvananthapuram: University of Travancore, 1953

Malatimadhava of Bhavabhuti, ed. by jibanandaVidyasagara, Calcutta: Sarasvati Press, 1876

Malatimadhava of Bhavabhuti, with jagadhara's Comm. ed. by Ramkrishna Gopal Bhandarkar, Poona: Bhandarkar Oriental Research Institute, 1970

Malatimadhava of Bhavabhuti, with Chandrakala Sanskrit Comm. ed. by Srisesa Raja SarmaSastri, Varanasi: Chowkhamba Sanskrit Series, 1971

Mahaviracharita of Bhavabhuti, ed. by Anundoram Barooah, Assam: Publication Board, 1969

Malavikagnimitra of Kalidasa, ed. by M.R. Kale, Delhi: Motilal Banarsidass [MLBD], 1977

Meghaduta of Kalidasa, ed. by M.R. Kale, Bombay: Bookseller's Publishing Co. 1986

Manusmrti of Manu, ed. by Hara Govinda Sastri, Varanasi: Motilal Banarsidass (MLBD] 1970

Mrcchakatika of Sudraka, with Prithvidhara comm. ed. by M.R. Kale, Delhi: Motilal Banarsidass (MLBD), 1965

Natyasastra of Bharata, ed. by R.S. Nagar, Delhi: Parimal Publication, 1981

Natakalaksana-Ratna-Kosa of SagaraNandin, ed. by Babulal Sukla Shastri, Varanasi: Chowkhamba Sanskrit Series, 1972

Nirukta of Yaska, ed.by Lakshman Sarup, Delhi: Motilal Banarsidass (MLBD) 1967

Pancatantra of Vishnu Sharma London Longman 1986

Rasagangadhara of Jagannatha, ed. by Mathuranath Sastri, Delhi: Motilal Banarsidass (MLBD), 1983

Rajatarangini of Kalahana, ed. by Raghunatha Singha, Varanasi: Chowkhamba Sanskrit Series, 1968

Ratnavali of Harsa, ed. by M.R. Kale, Delhi: Motilal Banarsidass (MLBD) 1984

Rgveda, ed. by Ram Sarma Acarya, Varanasi: Chowkhamba Sanskrit Series, 1976

Sahityadarpana of Visvanatha, ed. by K.M. Sastri, Varanasi:

Chowkhamba Sanskrit Series, 1966
Sarasvatikanthabharana of Bhojaraja, ed. by Anandaram Baruah, Assam: Publication Board, 1969
Siddhanta-Kaumudi ed. by Vasudev Diksita, Varanasi: Chowkhamba Sanskrit Series, 1969
Satapathabrahmana, ed. by A. Weber, Varanasi: Chowkhamba Sanskrit Series, 1964.
Taittiriya Upanisad, ed. by Lokeswarananda, Calcutta: The Ramakrishna Mission Institute of Culture, 1996
Uttara-rama-charita of Bhavabhuti, ed. by P.V. Kane, Delhi: Motilal Banarsidass, 1962
Venisamhara of Bhattanarayana, ed. by M.R. Kale, Delhi: Motilal Banarsidass, 1989.
Vakroktijivita of Kuntaka, ed. by S.K. De, Calcutta: Firma K.L. Mukhopadhyay, 1961
Yogasutra of Patanjali, ed. by Bangalli Baba, Delhi: MotilalBanarsidass, 1976

(B) Secondary Sources

Agrawal, H.R. A Short History of Sanskrit Literature, Delhi: Munshiram Manoharlal (MML), 1939
Agrawal,K.M. (1990) "Kautilya on Crime and Punishment", Shree Almora Book Depot Publishing
Agrawal, A. 1989 Rise and fall of the emperial Guptas, Motilal Banarsidass New Delhi
Banarjee, S.C. A Companion to Sanskrit Literature, Delhi: Motilal Banarsidass, 1971
Bahadur, R.R. Sabdakalpadruma, Calcutta: New Bengali Press, 1931
Baruah, A. Bhavabhuti and His Place in Sanskrit Literature, Assam: Publication Board, 1971
Basham, A.L.1985 The wonder that was India Penguin New Delhi
Basu, . India in the age of the Brahmanas, Delhi: Motilal Banarsidass, 1969

Banarjee, S. Dharma Sutras, Calcutta: Punthi Pustak, 1962
Beniprasad, B 1927. Theory of Government in Ancient India, Allahabad, The Indian Press
Bhattacharya, V.C. Sanskrit Sahitya Ruprekha, Calcutta: Vidyodaya Library, 1930
Bhagavati, O.K. The Bhagavata Parana: A Socio-cultural Study, Allahabad: Vohro Publishers and Distributors, 1988
Bhattacharjee, H. The Cultural Heritage of India, Calcutta: The Ramakrishna Mission Institute of Culture, 1975
Bhat, O.K. Sanskrit Drama, Delhi: Ajanta Publication, 1985
Bhat, G.K. Bhavabhuti, Delhi: Sahitya Academi, 1979
Biswas, Dr. Bhagirathi. Sociology of Sanskrit Drama, Delhi: Indian Publishers, 1999
Biswas, A.K. and Sulekha Biswas. (1996), Minerals and Metals in Kautiliya's Arthasastra. In Minerals and Metals in Ancient India.Vol.II.D.K. Print world (P) Ltd., New Delhi.
Borooah, A. Prosody, Assam: Publication Board, 1975
Boesche, Roger, (2003) "Kautilya sarthashastra on War and Diplomacy in Ancient India", The Journal of Military History, Vol. 67
Brekke, Torkel. (2004), "Weilding the Rod Punishment – War and Violence in the Politcal Science of Kautilya, Journal of Military Ethics, Vol 3, No. 1
Burnell, A. C. (1995), The Ordinances of Manu, Translated From the Sanskrit with an Introduction by the Late Arthur Coke Burnell, Completed and Edited by Edward W. Hopkins, Munshiram Manoharlal Publishers Pvt. Ltd., New Delhi.
Chaitnya, K. Sanskrit Poetics: A Critical and Comparative Study, New York: Asian Publishing House, 1965
Chattopadhyaya, S. Nataka-Laksana-Ratnakosa in the Perspective of Ancient India Drama and Dramaturgy, Calcutta: PunthiPustak, 1974
Choudhury, N.N. Kavyatattvasamiksa, Delhi: Motilal Banarsidass, 1959

Choudhary, R.K., (1971), 'Kautilya's Political Ideas & Institutions', Chowkhamba Sanskrit Series Office, Varanasi

Dasgupta, S.N. A History of Sanskrit Literature, Calcutta: University of Calcutta, 1962

Dalai, M. Conflict in Sanskrit Drama, Bombay: Somaiya Publication, 1973

De, S.K. A History of Sanskrit Literature, Calcutta: University of Calcutta, 1977

Derrett, J. D. M.(1976, Essays in Classical and Modern Hindu Law: Dharmasastra and Related Ideas, Vol 1, E. J. Brill, Leiden.

Dreamier, C. 1962, Kingship and Community in Early India, Stanford University Press, Stanford.

Dutta, M.N. 1979The DharmaShastra,: Cosmo Publications, Delhi

Dutt, M.N.1896 Kamandakiya Ntisara or Elements of Polity Calcutta

Dvivedi, S.B. and Pandeya, S1981. Sanskrit SahityakaItihasa,: Grantham Rambag, Kanpur

Ghoshal.U.N1959.A history of Indian political ideas: the ancient period and the period of transition to the middle ages.. Oxford University Press Bombay

Girija, A1991. Alamkarakaustubha of Kavikarnapura: A Study, Calcutta: PunthiPustak,

Gera, V. 1973Mind and Art of Bhavabhuti, Delhi: Meharchand Lachhmandas,

Gopal, M. H. 1935, Mauryan Public Finance, George Allen &Unwin Ltd, London. Goyal, S. R. 1985, Kautilya and Megasthenes, Kusumanjali Praksshan, Meerut

.Gupta, V.K., (1987), "Kautilyan Jurisprudence", B.D.Gupta Publishers

Harshe, R.G. Observation on the Life and Works of Bhavabhuti, Delhi: Meharchand Lachhmandas, 1974

K.P. Jayaswal 2006 rev ednHindu Polity: A Constitutional History of India Chowkamba publishers, New Delhi

Jagirdar, R.V. Drama in Sanskrit Literature, Bombay: Popular Book Depot, 1947 Karmakar, R.D. Bhavabhuti, Dharwar: Karnatak University, 1971

Kane, P.V. History of Sanskrit Poeties, Delhi: Motilal Banarsidass, 1961

Kane, P.V.1941 History of Dharmasastra, Bhandarkar 8 Volumes Oriental Research InstitutePoona

Kangle, R. P. (1972), The KautiliyaArthasastra : Part H-An English Translation With Criticial and Explanatory Notes, 2nd edition, MotilalBanarsidass Publishers Pvt. Ltd, Delhi.

Kangle, R. P. (1986), The Kautiliya Arthasastra: Part III—A Study, Motilal Banarsidass Publishers Pvte Ltd, Delhi.

Keith, A.B. The Sanskrit Drama in Its origin Development Theory and Practice, London: Oxford University Press, 1924

Keith, A.B. A History of Sanskrit Literature, Delhi: MotilalBanarsidass (MLBD), 1993

Kosambi, D.D The line of Arthasastra, Indian Historical Review, Vol.V, 1955

Krsnamacharya, M. History of Classical Sanskrit Literature, Delhi: Motilal Banarsidass, 1937

Kumar, D. Sanskrit Natako Ki Hindi Anuvad, Delhi: Rajpal and Sons. 1967

Kumar, P. The Treatment of Pathos in Sanskrit Dramas, Delhi: Nag Publishers, 1981

Mankad, D. Types of Sanskrit Drama, Karachi: UrmiPrakash and Mandir, 1936

Macdonel, A.A. History of Sanskrit Literature, Delhi: Motilal Banarsidass, 1962

S.K. Maity1975The Imperial Guptas and Their Times (cir. AD 300-550)Munshiram Manoharlal Publishers, New Delhi

Menon,. K.P., (1998), "Kautilya on Rajaniti", Nag Publishers

Misra, R.C. Sanskrit Sahityetihasah, Varanasi: Chowkhamba Vidyabhawan, 1970

Mitra, P.D, Mirror of Composition Varanasi: Motilal Banarsidass, 1956

Mukherjee, Bharti, 1976, "Kautilya s Concept of Diplomacy", Minerva Associates Publications, Calcutta, India.

Mukherji, R. Rasasamiksa, Calcutta: Sanskrit PustakBhandar, 1384 San.

Mirashi, V.V. Bhavabhuti, Delhi: Motilal Banarsidass, 1974

Mitra Rajendralal 1982 The Nitisara or The Elements of Polity By Kamandaki, Calcutta Asiatic Society

Parmar, A.A., (1987),"Techniques of statecraft: A study of Kautilaya's Arthashastra", Atmaram and Sons, Delhi

Pandey, K.C. Comparative Aesthetics, Vol. L Varanasi: Chowkhamba Sanskrit Series, 1995

Pandey, P.M. Perspectives in Bhavabhuti, Nagpur: Nagpur Sahitya Prasar Kendra, 1974

Pandey, I.P. Dress and Ornaments in Ancient India, Delhi: Bharatiya Vidya Prakashan, 1988

Pushpendra Kumar, (1989), "Kautilya Arthasastra: An Appraisal" Nag Publishers, ISBN: 81-7081-199-6

Rangacharya, A. Introduction to Bharato's Notyosostra, Bombay: Popular Prakashan, 1966

Rangarajan, L. N. (1992), Kautilya—The Arthasastra: Edited, Rearranged, Translated and Introduced, Penguin Books India, New Delhi.

Raghavan, V. The Number of Rasas, Madras: Adyar Library and Research Centre, 1967

Rao, M.V. Krishna : (1958), 'Studies in Kautilya,',Munshi Ram Manoharlal, Delhi

Salaetoer, B.1963 Ancient Indian Political Thought Asia Publishing House Mumbai

Sharma, R.S.1990 Aspect of Political Ideas, Institutions in Ancient India Motilal Banarsidass New Delhi

Shastri, S.N. The Laws and Practice of Sanskrit Drama, Vol. I Varanasi: Chowkhamba Sanskrit Series, 1961

ShamaSastri, R., (1909), Kaumiliya Carthaógstram.The Arthasastra of Kautilya. Ed. ByMysore, Printed at the Government Branch Press,

ShamaSastri, R., (1956), 'The Arthg]astra of Kautilya' (translated into English) Raghuvir Printing Press, Mysore
Schuryler, M. A Bibliography of the Sanskrit Drama, Delhi: Asian Publication Services, 1977
Spelmnan, J. W. (1964), Political Theory Of Ancient India: A Study of Kingship From the Earliest Times to circa A.D. 300, Clarendon Press, Oxford.
Tarlekar, G.H. Studies in Sanskrit Drama, Delhi: Motilal Banarsidass, 1975
Tawney, C.H. The Kathasaritsagara Vol. I. and II, New Delhi: Munshiram Manoharlal Publishers, 1992
Vivekananda, S. The Complete Works, Vol. II, III, IV, V, Kolkata: AdvaitaAshrama, 2004
Warder, A.K. Indian Kavya Literature, Vol. I-III, Delhi: Motilal Banarsidass, 1977
Winternitz, M. History of Indian Literature Vol. Ill, Delhi: MotilalBanarsidass, 1977
Wilson, H.H. On the Dramatic System of the Hindus, Calcutta: Sanskrit Pustak Bhandar, 1971
Wilson, H.H. Dramas, Varanasi: Chowkhamba Sanskrit Series, 1962